ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

# (वाक्य सहित)

# सप्तमकाण्डे पञ्चमः प्रश्नः

**Notes:**

1. **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **September 30, 2021**

# Version Notes:

**This is now the current Version 1.0 dated September 30, 2021.**

1. This replaces the earlier version 0.1 dated March 31, 2020.

2. We have listened to the Pada Parayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till September 30, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 30th September 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.0 dated 30th November 2019 |
| 4th | Version Number | 0.1 dated 31st Mar 2020 |

# Contents


7 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां सप्तमं काण्डं 4

7.5 सप्तमकाण्डे पञ्चमः प्रश्नः – सत्रविशेषाभिधानं ........................................ 4

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, हरिः ओं

# 7 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां सप्तमं काण्डं

## 7.5सप्तमकाण्डे पञ्चमः प्रश्नः – सत्रविशेषाभिधानं

**TS 7.5.1.1**

गावो वा एतथ् सत्र–मासताशृङ्गाः सतीः शृङ्गाणि नो जायन्ता इति

कामेन तासां दशमासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त

ता उदतिष्ठन्नराथ्स्मेत्यथ यासां नाजायन्त ताः सँवथ्सर–माप्त्वोदतिष्ठ–

न्नराथ्स्मेति यासां चाजायन्त यासां च न ता उभयीरु–दतिष्ठ–

न्नराथ्स्मेति गोसत्रं ँवै – [ ] 1

**TS 7.5.1.1 - Padam**

गावः । वै । एतत् । सत्रम् । आसत । अशृङ्गाः । सतीः । शृङ्गाणि ।

नः । जायन्तै । इति । कामेन । तासाम् । दश । मासाः । निषण्णा इति

नि – सन्नाः । आसन्न् । अथ । शृङ्गाणि । अजायन्त । ताः । उदिति ।

अतिष्ठन्न् । अराथ्स्म । इति । अथ । यासाम् । न ।

अजायन्त । ताः । सँवथ्सरमिति सं – वथ्सरम् । आप्त्वा । उदिति ।
अतिष्ठन्न् । अराथ्स्म । इति । यासाम् । च । अजायन्त । यासाम् ।
च । न । ताः । उभयीः । उदिति । अतिष्ठन्न् । अराथ्स्म । इति ।
गोसत्रमिति गो – सत्रम् । वै । **1 (50)**

**<u>TS 7.5.1.2</u>**

सँवथ्सरो य एवं ँविद्वा॒ꣳसः सँवथ्सर–मुपयन्त्यृद्ध्नुवन्त्येव तस्मात्
तूपरा वार्.षिकौ मासौ पर्त्वा चरति सत्राभिजितꣳह्यस्यै तस्माथ्
सँवथ्सरसदो यत् किं च गृहे क्रियते तदाप्त–मवरुद्ध–मभिजितं
क्रियते समुद्रं ँवा एते प्र प्लवन्ते ये सँवथ्सरमुपयन्ति यो वै
समुद्रस्य पारं न पश्यति न वै स तत उदेति सँवथ्सरो – [ ] **2**

**<u>TS 7.5.1.2 - Padam</u>**

सँवथ्सर इति सं – वथ्सरः । ये । एवम् । विद्वा॒ꣳसः ।
सँवथ्सरमिति सं – वथ्सरम् । उपयन्तीत्युप – यन्ति ।
ऋद्ध्नुवन्ति । एव । तस्मात् । तूपरा । वार्.षिकौ । मासौ । पर्त्वा ।
चरति । सत्राभिजितमिति सत्र – अभिजितम् । हि । अस्यै ।

तस्मात् । सँवथ्सरसद इति सँवथ्सर – सदः । यत् । किम् । च ।
गृहे । क्रियते । तत् । आप्तम् । अवरुद्धमित्यव–रुद्धम् ।
अभिजितमित्यभि – जितम् । क्रियते । समुद्रम् । वै । एते । प्रेति ।
प्लवन्ते । ये । सँवथ्सरमिति सं – वथ्सरम् । उपयन्तीत्युप–यन्ति ।
यः । वै । समुद्रस्य । पारम् । न । पश्यति । न । वै । सः । ततः ।
उदिति । एति । सँवथ्सर इति सं – वथ्सरः । **2 (50)**

**TS 7.5.1.3**

वै समुद्रस्तस्यैतत् पारं यँदतिरात्रौ य एवं विँद्वा॒ꣳसः सँवथ्सर–
मुपयन्त्यनार्ता एवोदृचं गच्छन्तीयं वैँ पूर्वो ऽतिरात्रो ऽसावुत्तरो मनः
पूर्वो वागुत्तरः प्राणः पूर्वो ऽपान उत्तरः प्ररोधनं पूर्व उदयनमुत्तरो
ज्योतिष्टोमो वैश्वानरो ऽतिरात्रो भवति ज्योतिरेव पुरस्ताद्–दधते
सुवर्गस्य लोकस्या–नुख्यात्यै चतुर्वि॒ꣳशः प्रायणीयो भवति
चतुर्वि॒ꣳशति–रर्द्धमासाः – [ ] **3**

**TS 7.5.1.3 - Padam**

वै । समुद्रः । तस्य । एतत् । पारम् । यत् । अतिरात्रावित्यति-रात्रौ ।
ये । एवम् । विद्वा॒ऽ॒सः । सँवथ्सरमिति सं - वथ्सरम् ।
उपयन्तीत्युप - यन्ति । अनार्ताः । एव । उदृचमित्युत् - ऋचम् ।
गच्छन्ति । इयम् । वै । पूर्वः । अतिरात्र इत्यति - रात्रः । असौ ।
उत्तर इत्युत् - तरः । मनः । पूर्वः । वाक् । उत्तर इत्युत् - तरः ।
प्राण इति प्र -अनः । पूर्वः । अपान इत्यप - अनः ।
उत्तर इत्युत् -तरः । प्ररोधनमिति प्र - रोधनम् । पूर्वः ।
उदयनमित्युत्-अयनम् । उत्तर इत्युत् - तरः । ज्योतिष्टोम इति
ज्योतिः-स्तोमः । वैश्वानरः । अतिरात्र इत्यति - रात्रः । भवति ।
ज्योतिः । एव । पुरस्तात् । दधते । सुवर्गस्येति सुवः - गस्य ।
लोकस्य । अनुख्यात्या इत्यनु - ख्यात्यै । चतुर्वि॒ऽ॒श
इति चतुः - वि॒ऽ॒शः । प्रायणीय इति प्र - अयनीयः । भवति ।
चतुर्वि॒ऽ॒शतिरिति चतुः - वि॒ऽ॒शतिः ।
अर्द्धमासा इत्यर्द्ध - मासाः । **3 (50)**

**TS 7.5.1.4**

सँवथ्सरः प्रयन्त एव सँवथ्सरे प्रति तिष्ठन्ति तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावतीः सँवथ्सरस्य रात्रय उभे एव सँवथ्सरस्य रूपे आप्नुवन्ति ते स॑स्थित्या अरिष्ट्या उत्तरैरहोभिश्चरन्ति षडहा भवन्ति षड् वा ऋतवः सँवथ्सर ऋतुष्वेव सँवथ्सरे प्रति तिष्ठन्ति गौश्चाऽऽ*युश्च मद्ध्यतः स्तोमौ भवतः सँवथ्सरस्यैव तन्मिथुनं मद्ध्यतो –[ ] **4**

**TS 7.5.1.4 - Padam**

सँवथ्सर इति सं – वथ्सरः । प्रयन्त इति प्र – यन्तः । एव । सँवथ्सर इति सं – वथ्सरे । प्रतीति । तिष्ठन्ति । तस्य । त्रीणि । च । शतानि । षष्टिः । च । स्तोत्रीयाः । तावतीः । सँवथ्सरस्येति सं – वथ्सरस्य । रात्रयः । उभे इति । एव । सँवथ्सरस्येति सं – वथ्सरस्य । रूपे इति । आप्नुवन्ति । ते । स॑स्थित्या इति सं–स्थित्यै । अरिष्ट्यै । उत्तरैरित्युत् – तरैः । अहोभिरित्यहः–भिः । चरन्ति । षडहा इति षट् – अहाः । भवन्ति । षट् । वै । ऋतवः ।

सँवथ्सर इति सं – वथ्सरः । ऋतुषु । एव । सँवथ्सर इति

सं–वथ्सरे । प्रतीति । तिष्ठन्ति । गौः । च । आयुः । च । मद्ध्यतः ।

स्तोमौ । भवतः । सँवथ्सरस्येति सं – वथ्सरस्य । एव । तत् ।

मिथुनम् । मद्ध्यतः । **4 (50)**

**TS 7.5.1.5**

दधति प्रजननाय ज्योतिरभितो भवति विमोचनमेव तच्छन्दाꣳस्येव

तद्–विमोकं ँयन्त्यथो उभयतोज्योतिषैव षडहेन सुवर्गं ँलोकं ँयन्ति

ब्रह्मवादिनो वदन्त्यासते केन यन्तीति देवयानेन पथेति ब्रूयाच्छन्दाꣳसि

वै देवयानः पन्था गायत्री त्रिष्टुब्–जगतीज्योतिर्वै गायत्री

गौस्त्रिष्टुगायुर्जगती यदेते स्तोमा भवन्ति देवयानेनैव – [ ] **5**

**TS 7.5.1.5 - Padam**

दधति । प्रजननायेति प्र – जननाय । ज्योतिः । अभितः । भवति ।

विमोचनमिति वि – मोचनम् । एव । तत् । छन्दाꣳसि । एव ।

तत् । विमोकमिति वि – मोकम् । यन्ति । अथो इति ।

उभयतोज्योतिषेत्युभयतः–ज्योतिषा । एव । षडहेनेति षट्–अहेन ।

सुवर्गमिति सुवः - गम् । लोकम् । यन्ति । ब्रह्मवादिन इति
ब्रह्म - वादिनः । वदन्ति । आसते । केन । यन्ति । इति ।
देवयानेनेति देव - यानेन । पथा । इति । ब्रूयात् । छन्दाᳩसि । वै ।
देवयान इति देव - यानः । पन्थाः । गायत्री । त्रिष्टुप् । जगती ।
ज्योतिः । वै । गायत्री । गौः । त्रिष्टुक् । आयुः । जगती । यत् ।
एते । स्तोमाः । भवन्ति । देवयानेनेति देव-यानेन । एव । **5 (50)**

**<u>TS 7.5.1.6</u>**

तत् पथा यन्ति समानᳩ साम भवति देवलोको वै साम देवलोकादेव
नयन्त्यन्याअन्या ऋचो भवन्ति मनुष्यलोको वा ऋचो
मनुष्यलोकादेवान्यमन्यं देवलोकमभ्यारोहन्तो यन्त्यभिवर्तो ब्रह्मसामं
भवति सुवर्गस्य लोकस्याभिवृत्या अभिजिद्-भवति सुवर्गस्य
लोकस्याभिजित्यै विश्वजिद्-भवति विश्वस्य जित्यै मासिमासि
पृष्ठान्युप यन्ति मासिमास्यतिग्राह्या गृह्यन्ते मासिमास्येव
वीर्यं ( ) दधति मासां प्रतिष्ठित्या उपरिष्टान्मासां पृष्ठान्युप यन्ति
तस्मादुपरिष्टादोषधयः फलं गृह्णन्ति ॥ **6**

## TS 7.5.1.6 - Padam

तत् । पथा । यन्ति । समानम् । साम । भवति । देवलोक इति

देव – लोकः । वै । साम । देवलोकादिति देव – लोकात् ।

एव । न । यन्ति । अन्याअन्या इत्यन्याः – अन्याः । ऋचः ।

भवन्ति । मनुष्यलोक इति मनुष्य – लोकः । वै । ऋचः ।

मनुष्यलोकादिति मनुष्य – लोकात् । एव ।

अन्यमन्यमित्यन्यम् – अन्यम् । देवलोकमिति देव – लोकम् ।

अभ्यारोहन्त इत्यभि–आरोहन्तः । यन्ति । अभिवर्त इत्यभि – वर्तः ।

ब्रह्मसाममिति ब्रह्म – सामम् । भवति । सुवर्गस्येति सुवः – गस्य ।

लोकस्य । अभिवृत्या इत्यभि – वृत्यै । अभिजिदित्यभि – जित् ।

भवति । सुवर्गस्येति सुवः – गस्य । लोकस्य । अभिजित्या

इत्यभि – जित्यै । विश्वजिदिति विश्व – जित् । भवति । विश्वस्य ।

जित्यै । मासिमासीति मासि – मासि । पृष्ठानि । उपेति । यन्ति ।

मासिमासीति मासि – मासि । अतिग्राह्या इत्यति – ग्राह्याः ।

गृह्यन्ते । मासिमासीति मासि – मासि । एव । वीर्यम् ( ) । दधति ।

मासाम् । प्रतिष्ठित्या इति प्रति – स्थित्यै । उपरिष्टात् । मासाम् ।
पृष्ठानि । उपेति । यन्ति । तस्मात् । उपरिष्टात् । ओषधयः । फलम् ।
गृह्णन्ति ॥ **6 (63)** *(गोसत्रं वाँ – एति सँवथ्सरो – ऽर्द्धमासा – मिथुनं मद्ध्यतो – देवयानेनैव – वीर्यं – त्रयोदश च) (A1)*

**TS 7.5.2.1**

गावो वा एतथ् सत्रमासताशृङ्गाः सतीः शृङ्गाणि सिषासन्तीस्तासां
दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता अब्रुवन्नराथ्स्मोत्
तिष्ठामाव तं काममरुथ्स्महि येन कामेन न्यषदामेति तासामु त्वा
अब्रुवन्नर्द्धावा यावतीर्वा ऽऽसामहा एवेमौद्वादशौ मासौ सँवथ्सरꣳ
संपाद्योत् तिष्ठामेति तासां – [ ] **7**

**TS 7.5.2.1 - Padam**

गावः । वै । एतत् । सत्रम् । आसत । अशृङ्गाः । सतीः । शृङ्गाणि ।
सिषासन्तीः । तासाम् । दश । मासाः । निषण्णा इति नि – सन्नाः ।
आसन्न् । अथ । शृङ्गाणि । अजायन्त । ताः । अब्रुवन्न् । अराथ्स्म ।
उदिति । तिष्ठाम । अवेति । तम् । कामम् । अरुथ्स्महि । येन ।

कामेन । न्यषदामेति नि – असदाम । इति । तासाम् । उ । तु । वै ।
अब्रुवन्न् । अर्द्धाः । वा । यावतीः । वा । आसामहै । एव । इमौ ।
द्वादशौ । मासौ । सँवथ्सरमिति सं – वथ्सरम् । संपाद्येति
सं – पाद्य । उदिति । तिष्ठाम । इति । तासाम् । **7 (50)**

**TS 7.5.2.2**

द्वादशे मासि शृङ्गाणि प्रावर्तन्त श्रद्धया वा ऽश्रद्धया वा ता
इमा यास्तूपरा उभय्यो वाव ता आर्द्ध्नुवन्. याश्च शृङ्गाण्यसन्वन्.
याश्चोर्जमवारुन्धतर्द्ध्नोति दशसु मासूत्तिष्ठन्नृद्ध्नोति द्वादशसु
य एवं वेद पदेन खलु वा एते यन्ति विन्दति खलु वै पदेन यन्
तद्–वा एतदृद्धमयनं तस्मा ( ) देतद्–गोसनि ॥ **8**

**TS 7.5.2.2 - Padam**

द्वादशे । मासि । शृङ्गाणि । प्रेति । अवर्तन्त । श्रद्धयेति श्रत्–धया ।
वा । अश्रद्धयेत्यश्रत् – धया । वा । ताः । इमाः । याः । तूपराः ।
उभय्यः । वाव । ताः । आर्द्ध्नुवन्न् । याः । च । शृङ्गाणि ।
असन्वन्न् । याः । च । ऊर्जम् । अवारुन्धतेत्यव – अरुन्धत ।

ऋद्ध्नोति । दशस्विति दश – सु । मासु । उत्तिष्ठन्नित्युत्–तिष्ठन्न् ।

ऋद्ध्नोति । द्वादशस्विति द्वादश – सु । यः । एवम् । वेद । पदेन ।

खलु । वै । एते । यन्ति । विन्दति । खलु । वै । पदेन । यन्न् । तत् ।

वै । एतत् । ऋद्धम् । अयनम् । तस्मात् ( ) । एतत् ।

गोसनीति गो – सनि ॥ **8 (52)**

*(तिष्ठामेति तासां – तस्माद् – द्वे च) (A2)*

**TS 7.5.3.1**

प्रथमे मासि पृष्ठान्युप यन्ति मद्ध्यम उप यन्त्युत्तम उप यन्ति

तदाहुर्यां ँवै त्रिरेकस्याह्न उपसीदन्ति दह्नं ँवै सा ऽपराभ्यां

दोहाभ्यां दुहे ऽथ कुतः सा धोक्ष्यते यां द्वादश कृत्व उपसीदन्तीति

सँवथ्सरꣳ संपाद्योत्तमे मासि सकृत् पृष्ठान्युपेयुस्तद्–यजमाना

यज्ञं पशूनव रुन्धते समुद्रं ँवा – [ ] **9**

**TS 7.5.3.1 - Padam**

प्रथमे । मासि । पृष्ठानि । उपेति । यन्ति । मद्ध्यमे । उपेति । यन्ति ।

उत्तम इत्युत् – तमे । उपेति । यन्ति । तत् । आहुः । याम् । वै । त्रिः ।

एकस्य । अह्नः । उपसीदन्तीत्युप – सीदन्ति । दह्नम् । वै । सा ।

अपराभ्याम् । दोहाभ्याम् । दुहे । अथ । कुतः । सा ।

धोक्ष्यते । याम् । द्वादश । कृत्वः । उपसीदन्तीत्युप – सीदन्ति ।

इति । सँवथ्सरमिति सं – वथ्सरम् । संपाद्येति सं – पाद्य ।

उत्तम इत्युत् – तमे । मासि । सकृत् । पृष्ठानि । उपेति । इयुः ।

तत् । यजमानाः । यज्ञम् । पशून् । अवेति । रुन्धते । समुद्रम् ।

वै । **9 (50)**

**TS 7.5.3.2**

एते ऽनवारमपारं प्र प्लवन्ते ये सँवथ्सरमुपयन्ति यद् बृहद्रथन्तरे अन्वर्जेयुर्यथा मद्ध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक् तदनुथ्सर्गं बृहद्रथन्तराभ्यामित्वा प्रतिष्ठां गच्छन्ति सर्वेभ्यो वै कामेभ्यः सन्धिर्दुहे तद्–यजमानाः सर्वान् कामानव रुन्धते ॥ **10**

**TS 7.5.3.2 - Padam**

एते । अनवारम् । अपारम् । प्रेति । प्लवन्ते । ये ।

सँवथ्सरमिति सं – वथ्सरम् । उपयन्तीत्युप – यन्ति । यत् ।

बृहद्रथन्तरे इति बृहत् – रथन्तरे । अन्वर्जेयुरित्यनु – अर्जेयुः ।
यथा । मद्ध्ये । समुद्रस्य । प्लवम् । अन्वर्जेयुरित्यनु – अर्जेयुः ।
तादृक् । तत् । अनुथ्सर्गमित्यनुत् – सर्गम् । बृहद्रथन्तराभ्यामिति
बृहत् – रथन्तराभ्याम् । इत्वा । प्रतिष्ठामिति प्रति – स्थाम् ।
गच्छन्ति । सर्वेभ्यः । वै । कामेभ्यः । सन्धिरिति सं – धिः । दुहे ।
तत् । यजमानाः । सर्वान् । कामान् । अवेति । रुन्धते ॥ **10 (34)**

*(समुद्रं वैँ – चतुस्त्रिꣳशच्च) (A3)*

**TS 7.5.4.1**

समान्य ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेव न
यन्त्यन्यदन्यथ् साम भवति देवलोको वै साम देवलोकादेवान्यमन्यं
मनुष्यलोकं प्रत्यवरोहन्तो यन्ति जगतीमग्र उप यन्ति जगतीं वैँ
छन्दाꣳसि प्रत्यवरोहन्त्या–ग्रयणं ग्रहा बृहत् पृष्ठानि
त्रयस्त्रिꣳशꣳस्तोमा–स्तस्मा–ज्ज्यायाꣳसं कनीयान् प्रत्यवरोहति
वैश्वकर्मणो गृह्यतेविश्वान्येव तेन कर्माणि यजमाना अव रुन्धत
आदित्यो–[ ] **11**

**TS 7.5.4.1 - Padam**

समान्यः । ऋचः । भवन्ति । मनुष्यलोक इति मनुष्य – लोकः । वै । ऋचः । मनुष्यलोकादिति मनुष्य – लोकात् । एव । न । यन्ति । अन्यदन्यदित्यन्यत् – अन्यत् । साम । भवति । देवलोक इति देव – लोकः । वै । साम । देवलोकादिति देव – लोकात् । एव । अन्यमन्यमित्यन्यं – अन्यम् । मनुष्यलोकमिति मनुष्य – लोकम् । प्रत्यवरोहन्त इति प्रति – अवरोहन्तः । यन्ति । जगतीम् । अग्रे । उपेति । यन्ति । जगतीम् । वै । छन्दाꣳसि । प्रत्यवरोहन्तीति प्रति – अवरोहन्ति । आग्रयणम् । ग्रहाः । बृहत् । पृष्ठानि । त्रयस्त्रिꣳशमिति त्रयः – त्रिꣳशम् । स्तोमाः । तस्मात् । ज्यायाꣳसम् । कनीयान् । प्रत्यवरोहतीति प्रति – अवरोहति । वैश्वकर्मण इति वैश्व – कर्मणः । गृह्यते । विश्वानि । एव । तेन । कर्माणि । यजमानाः । अवेति । रुन्धते । आदित्यः । **11 (50)**

**TS 7.5.4.2**

गृह्यत इयं ँ वा अदितिरस्यामेव प्रति तिष्ठन्त्यन्योऽन्यो गृह्येते

मिथुनत्वाय प्रजात्या अवान्तरं ँ वै दशरात्रेण प्रजापतिः प्रजा असृजत

यद्–दशरात्रो भवति प्रजा एव तद्–यजमानाः सृजन्त एताꣳ ह वा

उदङ्कः शौल्बायनः सत्रस्यर्द्धिमुवाच यद्–दशरात्रोयद्–दशरात्रो

भवति सत्रस्यर्द्ध्या अथो यदेव पूर्वेष्वहस्सु विलोम क्रियते

तस्यैवै ( )–षा शान्तिः ॥ 12

**TS 7.5.4.2 - Padam**

गृह्यते । इयम् । वै । अदितिः । अस्याम् । एव । प्रतीति । तिष्ठन्ति ।

अन्योन्य इत्यन्यः – अन्यः । गृह्येते इति ।

मिथुनत्वायेति मिथुन – त्वाय । प्रजात्या इति प्र – जात्यै ।

अवान्तरमित्यव – अन्तरम् । वै । दशरात्रेणेति दश – रात्रेण ।

प्रजापतिरिति प्रजा – पतिः । प्रजा इति प्र – जाः । असृजत ।

यत् । दशरात्र इति दश – रात्रः । भवति । प्रजा इति प्र – जाः ।

एव । तत् । यजमानाः । सृजन्ते । एताम् । ह । वै । उदङ्कः ।

शौल्बायनः । सत्रस्य । ऋद्धिम् । उवाच । यत् ।
दशरात्र इति दश – रात्रः । यत् । दशरात्र इति
दश – रात्रः । भवति । सत्रस्य । ऋद्ध्यै । अथो इति । यत् ।
एव । पूर्वेषु । अहस्स्वित्यहः – सु । विलोमेति वि – लोम ।
क्रियते । तस्य । एव ( ) । एषा । शान्तिः ॥ **12 (52)**

*(आदित्य – स्तस्यैव – द्वे च) (A4)*

**TS 7.5.5.1**

यदि सोमौ सꣳसुतौ स्यातां महति रात्रियै प्रातरनुवाक–मुपाकुर्यात्
पूर्वो वाचं पूर्वो देवताः पूर्वः छन्दाꣳसि वृङ्क्ते वृषण्वतीं प्रतिपदं कुर्यात्
प्रातस्सवनादेवैषामिन्द्रं ँवृङ्क्ते ऽथो खल्वाहुः
सवनमुखेसवनमुखे कार्येति सवनमुखाथ्सवनमुखा–देवैषामिन्द्रं
ँवृङ्क्ते सँवेशायोपवेशाय गायत्रियास्त्रिष्टुभो जगत्या अनुष्टुभः
पङ्क्त्या अभिभूत्यै स्वाहा छन्दाꣳसि वै सँवेश उपवेशः
छन्दोभिरेवैषां– [ ] **13**

**TS 7.5.5.1 - Padam**

यदि । सोमौ । स॒ꣳसुताविति सं – सुतौ । स्याताम् । महति । रात्रियै ।

प्रातरनुवाकमिति प्रातः – अनुवाकम् ।

उपाकुर्यादित्युप – आकुर्यात् । पूर्वः । वाचम् । पूर्वः । देवताः ।

पूर्वः । छन्दाꣳसि । वृङ्क्ते । वृषण्वतीमिति वृषण् – वतीम् ।

प्रतिपदमिति प्रति – पदम् । कुर्यात् । प्रातस्सवनादिति

प्रातः–सवनात् । एव । एषाम् । इन्द्रम् । वृङ्क्ते । अथो इति । खलु ।

आहुः । सवनमुखेसवनमुख इति सवनमुखे – सवनमुखे । कार्या ।

इति । सवनमुखाथ्सवनमुखादिति सवनमुखात् – सवनमुखात् ।

एव । एषाम् । इन्द्रम् । वृङ्क्ते । सँवेशायेति सं – वेशाय ।

उपवेशायेत्युप – वेशाय । गायत्रियाः । त्रिष्टुभः । जगत्याः । अनुष्टुभ

इत्यनु – स्तुभः । पङ्क्त्याः । अभिभूत्या इत्यभि – भूत्यै ।

स्वाहा । छन्दाꣳसि । वै । सँवेश इति सं – वेशः ।

उपवेश इत्युप – वेशः । छन्दोभिरिति छन्दः – भिः ।

एव । एषाम् । **13 (50)**

**TS 7.5.5.2**

छन्दा(ग्)ंसि वृङ्क्ते सजनीय(ग्)ं शस्यं ँविहव्य(ग्)ं शस्यमगस्त्यस्य

कयाशुभीय(ग्)ं शस्यमेतावद्–वा अस्ति यावदेतद्–यावदेवास्ति तदेषां

ँवृङ्क्ते यदि प्रातस्सवने कलशो दीर्येत वैष्णवीषु शिपिविष्टवतीषु

स्तुवीरन्. यद्–वै यज्ञस्या–तिरिच्यते विष्णुं तच्छिपिविष्टमभ्यति रिच्यते

तद्विष्णुः शिपिविष्टो ऽतिरिक्त एवातिरिक्तं दधात्यथो अतिरिक्तेनैवा–

तिरिक्तमाप्त्वाऽव ( ) रुन्धते यदि मद्ध्यन्दिने दीर्येत वषट्कारनिधन(ग्)ं

साम कुर्युर्वषट्कारो वै यज्ञस्य प्रतिष्ठा प्रतिष्ठामेवैनद्–गमयन्ति यदि

तृतीयसवन एतदेव ॥ **14**

**TS 7.5.5.2 - Padam**

छन्दा(ग्)ंसि । वृङ्क्ते । सजनीयमिति स – जनीयम् । शस्यम् ।

विहव्यमिति वि – हव्यम् । शस्यम् । अगस्त्यस्य । कयाशुभीयमिति

कया–शुभीयम् । शस्यम् । एतावत् । वै । अस्ति । यावत् । एतत् ।

यावत् । एव । अस्ति । तत् । एषाम् । वृङ्क्ते । यदि ।

प्रातस्सवन इति प्रातः – सवने । कलशः । दीर्येत । वैष्णवीषु ।

शिपिविष्टवतीष्विति शिपिविष्ट - वतीषु । स्तुवीरन्न् । यत् । वै ।
यज्ञस्य । अतिरिच्यत इत्यति - रिच्यते । विष्णुम् । तत् ।
शिपिविष्टमिति शिपि - विष्टम् । अभि । अतीति । रिच्यते ।
तत् । विष्णुः । शिपिविष्ट इति शिपि - विष्टः । अतिरिक्त
इत्यति- रिक्ते । एव । अतिरिक्तमित्यति - रिक्तम् । दधाति ।
अथो इति । अतिरिक्तेनेत्यति - रिक्तेन । एव ।
अतिरिक्तमित्यति - रिक्तम् । आप्त्वा । अवेति ( ) । रुन्धते । यदि ।
मद्ध्यन्दिने । दीर्येत । वषट्कारनिधनमिति वषट्कार - निधनम् ।
साम । कुर्युः । वषट्कार इति वषट् - कारः । वै । यज्ञस्य । प्रतिष्ठेति
प्रति - स्था । प्रतिष्ठामिति प्रति - स्थाम् । एव । एनत् । गमयन्ति ।
यदि । तृतीयसवन इति तृतीय - सवने । एतत् । एव ॥ **14 (69)**

*(छन्दोभिरेवैषा - मवै - कान्नविꣳशतिश्च) (A5)*

**TS 7.5.6.1**

षडहैर्मासान्थ् संपाद्याहरुथ् सृजन्ति षडहैर्. हि मासान्थ् संपश्यन्त्य-
र्द्धमासैर्मासान्थ् संपाद्याहरुथ् सृजन्त्य-र्द्धमासैर्. हि मासान्थ्

संपश्यन्त्यमावास्यया मासान्थ् संपाद्याहरुथ् सृजन्त्यमावास्यया हि मासान्थ् संपश्यन्ति पौर्णमास्या मासान्थ् संपाद्याहरुथ् सृजन्ति पौर्णमास्या हि मासान्थ् संपश्यन्ति यो वै पूर्ण आसिञ्चति परा स सिञ्चति यः पूर्णादुदचति - [ ] **15**

**TS 7.5.6.1 - Padam**

षडहैरिति षट् - अहैः । मासान् । संपाद्येति सं - पाद्य । अहः । उदिति । सृजन्ति । षडहैरिति षट् - अहैः । हि । मासान् । संपश्यन्तीति सं - पश्यन्ति । अर्द्धमासैरित्यर्द्ध - मासैः । मासान् । संपाद्येति सं - पाद्य । अहः । उदिति । सृजन्ति । अर्द्धमासैरित्यर्द्ध - मासैः । हि । मासान् । संपश्यन्तीति सं - पश्यन्ति । अमावास्ययेत्यमा - वास्यया । मासान् । संपाद्येति सं - पाद्य । अहः । उदिति । सृजन्ति । अमावास्ययेत्यमा - वास्यया । हि । मासान् । संपश्यन्तीति सं-पश्यन्ति । पौर्णमास्येति पौर्ण-मास्या । मासान् । संपाद्येति सं - पाद्य । अहः । उदिति । सृजन्ति ।

पौर्णमास्येति पौर्ण - मास्या । हि । मासान् । संपश्यन्तीति

सं - पश्यन्ति । यः । वै । पूर्णे । आसिञ्चतीत्या - सिञ्चति ।

परेति । सः । सिञ्चति । यः । पूर्णात् ।

उदचतीत्युत् - अचति । **15 (50)**

**TS 7.5.6.2**

प्राणमस्मिन्थ् स दधाति यत् पौर्णमास्या मासान्थ् संपाद्याहरुथ्

सृजन्ति सँवथ्सरायैव तत् प्राणं दधति तदनु सत्रिणः प्राणन्ति

यदहर्नोथ्-सृजेयुर्यथा दृतिरुपनद्धो विपतत्येवꣳ सँवथ्सरो

वि पतेदार्ति-मार्च्छेयुर्यत् पौर्णमास्या मासान्थ्-संपाद्याह-रुथ्सृजन्ति

सँवथ्सरायैव तदुदानं दधति तदनु सत्रिण उ - [ ] **16**

**TS 7.5.6.2 - Padam**

प्राणमिति प्र - अनम् । अस्मिन्न् । सः । दधाति । यत् ।

पौर्णमास्येति पौर्ण - मास्या । मासान् । संपाद्येति सं - पाद्य ।

अहः । उथ्सृजन्तीत्युत् - सृजन्ति । सँवथ्सरायेति सं-वथ्सराय ।

एव । तत् । प्राणमिति प्र - अनम् । दधति । तत् । अन्विति ।

सत्रिणः । प्रेति । अनन्ति । यत् । अहः । न ।

उथ्सृजेयुरित्युत्–सृजेयुः । यथा । दृतिः । उपनद्ध इत्युप – नद्धः ।

विपततीति वि – पतति । एवम् । सँवथ्सर इति सं – वथ्सरः ।

वीति । पतेत् । आर्तिम् । एति । ऋच्छेयुः । यत् । पौर्णमास्येति

पौर्ण – मास्या । मासान् । संपाद्येति सं – पाद्य । अहः ।

उथ्सृजन्तीत्युत् – सृजन्ति । सँवथ्सरायेति सं – वथ्सराय । एव ।

तत् । उदानमित्युत् – अनम् । दधति । तत् । अन्विति । सत्रिणः ।

उदिति । **16 (50)**

**TS 7.5.6.3**

दनन्ति नाऽऽर्तिमार्च्छन्ति पूर्णमासे वै देवानाꣳ सुतो यत् पौर्णमास्या

मासान्थ्–संपाद्याह–रुथ्सृजन्ति देवानामेव तद्–यज्ञेन यज्ञं

प्रत्यवरोहन्ति वि वा एतद्–यज्ञं छिन्दन्ति यथ् षडहसन्ततꣳ

सन्तमथाह–रुथ्सृजन्ति प्राजापत्यं पशुमा लभन्ते प्रजापतिः सर्वा देवता

देवताभिरेव यज्ञꣳ सं तन्वन्ति यन्ति वा एते सवनाद् ये ऽह–[ ] **17**

## TS 7.5.6.3 - Padam

अनन्ति । न । आर्तिम् । एति । ऋच्छन्ति । पूर्णमास इति
पूर्ण – मासे । वै । देवानाम् । सुतः । यत् । पौर्णमास्येति
पौर्ण – मास्या । मासान् । संपाद्येति सं – पाद्य । अहः ।
उथ्सृजन्तीत्युत् – सृजन्ति । देवानाम् । एव । तत् । यज्ञेन । यज्ञम् ।
प्रत्यवरोहन्तीति प्रति – अवरोहन्ति । वीति । वै । एतत् । यज्ञम् ।
छिन्दन्ति । यत् । षडहसन्ततमिति षडह – सन्ततम् । सन्तम् ।
अथ । अहः । उथ्सृजन्तीत्युत् – सृजन्ति । प्राजापत्यमिति
प्राजा–पत्यम् । पशुम् । एति । लभन्ते । प्रजापतिरिति प्रजा–पतिः ।
सर्वाः । देवताः । देवताभिः । एव । यज्ञम् । समिति । तन्वन्ति ।
यन्ति । वै । एते । सवनात् । ये । अहः । **17 (50)**

## TS 7.5.6.4

–रुथ्सृजन्ति तुरीयं खलु वा एतथ् सवनं ँयथ् सांनाय्यं ँयथ्
सांनाय्यं भवति तेनैव सवनान्न यन्ति समुपहूय भक्षयन्त्येतथ्–
सोमपीथा ह्येतर्.हि यथायतनं ँवा एतेषा८ं सवनभाजो देवता गच्छन्ति

ये ऽह–रुथ्सृजन्त्यनुसवनं पुरोडाशान् निर्वपन्ति यथायतनादेव
सवनभाजो देवता अव रुन्धते ऽष्टाकपालान् प्रातस्सवन
एकादशकपालान् माद्ध्यन्दिने सवने द्वादशकपाला॑–स्तृतीयसवने
छन्दा॑स्येवाऽऽप्त्वा ( ) –ऽव रुन्धते वैश्वदेवं चरुं तृतीयसवने
निर्वपन्ति वैश्वदेवं ँवै तृतीयसवनं तेनैव तृतीयसवनान्न यन्ति ॥ **18**

**TS 7.5.6.4 - Padam**

उथ्सृजन्तीत्युत् – सृजन्ति । तुरीयम् । खलु । वै । एतत् । सवनम् ।
यत् । सान्नाय्यमिति सां–नाय्यम् । यत् । सान्नाय्यमिति सां–नाय्यम् ।
भवति । तेन । एव । सवनात् । न । यन्ति । समुपहूयेति
सं – उपहूय । भक्षयन्ति । एतथ्सोमपीथा इत्येतत् – सोमपीथाः ।
हि । एतर्.हि । यथायतनमिति यथा – आयतनम् । वै । एतेषाम् ।
सवनभाज इति सवन – भाजः । देवताः । गच्छन्ति । ये । अहः ।
उथ्सृजन्तीत्युत् – सृजन्ति । अनुसवनमित्यनु – सवनम् ।
पुरोडाशान् । निरिति । वपन्ति । यथायतनादिति यथा – आयतनात् ।
एव । सवनभाज इति सवन – भाजः । देवताः । अवेति । रुन्धते ।

अष्टाकपालानित्यष्टा - कपालान् । प्रातस्सवन इति प्रातः - सवने ।
एकादशकपालानित्येकादश - कपालान् । माद्ध्यन्दिने । सवने ।
द्वादशकपालानिति द्वादश - कपालान् । तृतीयसवन इति
तृतीय - सवने । छन्दाꣳसि । एव । आप्त्वा ( ) । अवेति । रुन्धते ।
वैश्वदेवमिति वैश्व-देवम् । चरुम् । तृतीयसवन इति तृतीय-सवने ।
निरिति । वपन्ति । वैश्वदेवमिति वैश्व - देवम् । वै ।
तृतीयसवनमिति तृतीय - सवनम् । तेन । एव ।
तृतीयसवनादिति तृतीय - सवनात् । न । यन्ति ॥ **18 (65)**

*(उदच - त्यु - द्येऽह - राप्त्वा - पञ्चदश च) (A6)*

**TS 7.5.7.1**

उथ्सृज्यां(**3**)नोथ्सृज्या(**3**)मिति मीमाꣳसन्ते ब्रह्मवादिन-स्तद्वाहु-
रुथ्सृज्यमेवेत्य-मावास्यायां च पौर्णमास्यां चोथ्सृज्यमित्याहुरेते हि
यज्ञं ँवहत इति ते त्वाव नोथ्सृज्ये इत्याहुर्ये अवान्तरं ँयज्ञं भेजाते
इति या प्रथमा व्यष्टका तस्या-मुथ्सृज्यमित्याहुरेष वै मासो विशर
इति नाऽऽदिष्ट - [ ] **19**

**TS 7.5.7.1 - Padam**

उथ्सृज्या(3)मित्युत् – सृज्या(3)म् । न ।
उथ्सृज्या(3)मित्युत्– सृज्या(3)म् । इति । मीमाꣳसन्ते ।
ब्रह्मवादिन इति ब्रह्म – वादिनः । तत् । उ । आहुः ।
उथ्सृज्यमित्युत् – सृज्यम् । एव । इति ।
अमावास्यायामित्यमा – वास्यायाम् । च । पौर्णमास्यामिति
पौर्ण – मास्याम् । च । उथ्सृज्यमित्युत् – सृज्यम् । इति । आहुः ।
एते इति । हि । यज्ञम् । वहतः । इति । ते इति । तु । वाव । न ।
उथ्सृज्ये इत्युत् – सृज्ये । इति । आहुः । ये इति ।
अवान्तरमित्यव – अन्तरम् । यज्ञम् । भेजाते इति । इति । या ।
प्रथमा । व्यष्टकेति वि – अष्टका । तस्याम् ।
उथ्सृज्यमित्युत् – सृज्यम् । इति । आहुः । एषः । वै । मासः ।
विशर इति वि – शरः । इति । न ।
आदिष्टमित्या – दिष्टम् । **19 (50)**

**TS 7.5.7.2**

-मुथ् सृजेयु-र्यदादिष्ट-मुथ्सृजेयुर्यादृशे पुनः पर्याप्लावे मद्ध्ये

षडहस्य संपद्येत षडहैर्मासान्थ् संपाद्य यथ् सप्तम-महस्तस्मिन्नुथ्

सृजेयु-स्तदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेयुरैन्द्रं दधीन्द्राय

मरुत्वते पुरोडाशमेकादशकपालं वैँश्वदेवं द्वादशकपालमग्नेर्वै

वसुमतः प्रातस्सवनं यँदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपन्ति

देवतामेव तद्-भागिनीं कुर्वन्ति - [ ] **20**

**TS 7.5.7.2 - Padam**

उदिति । सृजेयुः । यत् । आदिष्टमित्या - दिष्टम् ।

उथ्सृजेयुरित्युत् - सृजेयुः । यादृशे । पुनः । पर्याप्लाव इति

परि - आप्लावे । मद्ध्ये । षडहस्येति षट् - अहस्य ।

संपद्येतेति सं - पद्येत । षडहैरिति षट् - अहैः । मासान् ।

संपाद्येति सं - पाद्य । यत् । सप्तमम् । अहः । तस्मिन्न् । उदिति ।

सृजेयुः । तत् । अग्नये । वसुमत इति वसु - मते । पुरोडाशम् ।

अष्टाकपालमित्यष्टा - कपालम् । निरिति । वपेयुः । ऐन्द्रम् । दधि ।

इन्द्राय । मरुत्वते । पुरोडाशम् ।

एकादशकपालमित्येकादश – कपालम् । वैश्वदेवमिति वैश्व–देवम् ।

द्वादशकपालमिति द्वादश – कपालम् । अग्नेः । वै । वसुमत इति

वसु – मतः । प्रातस्सवनमिति प्रातः – सवनम् । यत् । अग्नये ।

वसुमत इति वसु–मते । पुरोडाशम् । अष्टाकपालमित्यष्टा–कपालम् ।

निर्वपन्तीति निः – वपन्ति । देवताम् । एव । तत् । भागिनीम् ।

कुर्वन्ति । **20 (50)**

**TS 7.5.7.3**

सवनमष्टाभिरुप यन्ति यदैन्द्रं दधि भवतीन्द्रमेव तद्–भागधेयान्न

च्यावयन्तीन्द्रस्य वै मरुत्वतो माद्ध्यन्दिन॒ꣳ सवनं ँयदिन्द्राय मरुत्वते

पुरोडाशमेकादशकपालं निर्वपन्ति देवतामेव तद्–भागिनीं कुर्वन्ति

सवनमेकादशभिरुप यन्ति विश्वेषां ँवै देवानामृभुमतां

तृतीयसवनँयद्–वैश्वदेवं द्वादशकपालं निर्वपन्ति देवता एव तद्–

भागिनीः कुर्वन्ति सवनं द्वादशभि – [ ] **21**

**TS 7.5.7.3 - Padam**

सवनम् । अष्टाभिः । उपेति । यन्ति । यत् । ऐन्द्रम् । दधि । भवति ।
इन्द्रम् । एव । तत् । भागधेयादिति भाग–धेयात् । न । च्यावयन्ति ।
इन्द्रस्य । वै । मरुत्वतः । माद्ध्यन्दिनम् । सवनम् । यत् । इन्द्राय ।
मरुत्वते । पुरोडाशम् । एकादशकपालमित्येकादश – कपालम् ।
निर्वपन्तीति निः–वपन्ति । देवताम् । एव । तत् । भागिनीम् ।
कुर्वन्ति । सवनम् । एकादशभिरित्येकादश – भिः । उपेति । यन्ति ।
विश्वेषाम् । वै । देवानाम् । ऋभुमतामित्यृभु – मताम् ।
तृतीयसवनमिति तृतीय–सवनम् । यत् । वैश्वदेवमिति वैश्व–देवम् ।
द्वादशकपालमिति द्वादश – कपालम् । निर्वपन्तीति निः – वपन्ति ।
देवताः । एव । तत् । भागिनीः । कुर्वन्ति । सवनम् ।
द्वादशभिरिति द्वादश – भिः । **21 (50)**

**TS 7.5.7.4**

–रुप यन्ति प्राजापत्यं पशुमा लभन्ते यज्ञो वै प्रजापति–र्यज्ञस्या–
ननुसर्गायाभिवर्त इतः षण्मासो ब्रह्मसामं भवति ब्रह्म वा अभिवर्तो

ब्रह्मणैव तथ् सुवर्गं ँलोक–मभिवर्तयन्तो यन्ति प्रतिकूलमिव हीतः

सुवर्गो लोक इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।

शिक्षा नो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहीत्य ( )–मुत

आयता८ं षण्मासो ब्रह्मसामं भवत्ययं ँवै लोको ज्योतिः प्रजा

ज्योतिरिममेव तल्लोकं पश्यन्तोऽभिवदन्त आ यन्ति ॥ **22**

**<u>TS 7.5.7.4 - Padam</u>**

उपेति । यन्ति । प्राजापत्यमिति प्राजा – पत्यम् । पशुम् । एति ।

लभन्ते । यज्ञः । वै । प्रजापतिरिति प्रजा – पतिः । यज्ञस्य ।

अननुसर्गायेत्यननु – सर्गाय । अभिवर्त इत्यभि – वर्तः । इतः ।

षट् । मासः । ब्रह्मसाममिति ब्रह्म – सामम् । भवति । ब्रह्म । वै ।

अभिवर्त इत्यभि – वर्तः । ब्रह्मणा । एव । तत् । सुवर्गमिति

सुवः – गम् । लोकम् । अभिवर्तयन्त इत्यभि – वर्तयन्तः । यन्ति ।

प्रतिकूलमिति प्रति – कूलम् । इव । हि । इतः । सुवर्ग इति

सुवः – गः । लोकः । इन्द्र । क्रतुम् । नः । एति । भर । पिता ।

पुत्रेभ्यः । यथा ॥ शिक्ष । नः । अस्मिन्न् । पुरुहूतेति पुरु – हूत ।

यामनि । जीवाः । ज्योतिः । अशीमहि । इति ( ) । अमुतः ।

आयतामित्या – यताम् । षट् । मासः । ब्रह्मसाममिति ब्रह्म–सामम् ।

भवति । अयम् । वै । लोकः । ज्योतिः । प्रजेति प्र–जा । ज्योतिः ।

इमम् । एव । तत् । लोकम् । पश्यन्तः ।

अभिवदन्तइत्यभि – वदन्तः । एति । यन्ति ॥ **22 (70)**

*(नाऽऽदिष्टं – कुर्वन्ति – द्वादशभि – रिति– विꣳशतिश्च) (A7)*

**TS 7.5.8.1**

देवानां ँवा अन्तं जग्मुषामिन्द्रियं ँवीर्य–मपाक्रामत् तत्

क्रोशेनावारुन्धत तत् क्रोशस्य क्रोशत्वं ँयत् क्रोशेन चात्वालस्यान्ते

स्तुवन्ति यज्ञस्यैवान्तं गत्वेन्द्रियं ँवीर्यमव रुन्धते सत्रस्यर्द्ध्या

ऽऽहवनीयस्यान्ते स्तुवन्त्यग्नि–मेवोपद्रष्टारं कृत्वर्द्धिमुप यन्ति

प्रजापतेर्.हृदयेन हविर्द्धाने ऽन्तः स्तुवन्ति प्रेमाणमेवास्य

गच्छन्ति श्लोकेन पुरस्ताथ् सदसः – [ ] **23**

**TS 7.5.8.1 - Padam**

देवानाम् । वै । अन्तम् । जग्मुषाम् । इन्द्रियम् । वीर्यम् । अपेति । अक्रामत् । तत् । क्रोशेन । अवेति । अरुन्धत । तत् । क्रोशस्य । क्रोशत्वमिति क्रोश - त्वम् । यत् । क्रोशेन । चात्वालस्य । अन्ते । स्तुवन्ति । यज्ञस्य । एव । अन्तम् । गत्वा । इन्द्रियम् । वीर्यम् । अवेति । रुन्धते । सत्रस्यर्द्ध्या । आहवनीयस्येत्या - हवनीयस्य । अन्ते । स्तुवन्ति । अग्निम् । एव । उपद्रष्टारमित्युप - द्रष्टारम् । कृत्वा । ऋद्धिम् । उपेति । यन्ति । प्रजापतर्.हृदयेन । हविर्द्धान इति हविः - धाने । अन्तः । स्तुवन्ति । प्रेमाणम् । एव । अस्य । गच्छन्ति । श्लोकेन । पुरस्तात् । सदसः । **23 (50)**

**TS 7.5.8.2**

स्तुवन्त्यनुश्लोकेन पश्चाद्-यज्ञस्यैवान्तं गत्वा श्लोकभाजो भवन्ति नवभि-रद्ध्वर्यु-रुद्-गायति नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति सर्वा ऐन्द्रियो भवन्ति प्राणेष्वेवेन्द्रियं दध-त्यप्रतिहृताभि-रुद्-

गायति तस्मात् पुरुषः सर्वाण्यन्यानि शीर्.ष्णो ऽङ्गानि प्रत्यचति शिर एव न पञ्चदश॒ꣳरथन्तरं भवतीन्द्रियमेवाव रुन्धते सप्तदशं-[ ] **24**

**TS 7.5.8.2 - Padam**

स्तुवन्ति । अनुश्लोकेनेत्यनु - श्लोकेन । पश्चात् । यज्ञस्य । एव । अन्तम् । गत्वा । श्लोकभाज इति श्लोक - भाजः । भवन्ति । नवभिरिति नव - भिः । अद्ध्वर्युः । उदिति । गायति । नव । वै । पुरुषे । प्राणा इति प्र - अनाः । प्राणानिति प्र - अनान् । एव । यजमानेषु । दधाति । सर्वाः । ऐन्द्रियः । भवन्ति । प्राणेष्विति प्र - अनेषु । एव । इन्द्रियम् । दधति । अप्रतिहताभिरित्यप्रति - हताभिः । उदिति । गायति । तस्मात् । पुरुषः । सर्वाणि । अन्यानि । शीर्ष्णः । अङ्गानि । प्रतीति । अचति । शिरः । एव । न । पञ्चदशमिति पञ्च - दशम् । रथन्तरमिति रथं-तरम् । भवति । इन्द्रियम् । एव । अवेति । रुन्धते । सप्तदशमिति सप्त - दशम् । **24 (50)**

**TS 7.5.8.3**

बृह–दन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकवि॒ꣳशं भद्रं

द्विपदासु प्रतिष्ठित्यै पत्नय उप गायन्ति मिथुनत्वाय प्रजात्यै प्रजापतिः

प्रजा असृजत सो ऽकामयताऽऽसा–महꣳ राज्यं परीयामिति तासाꣳ

राजनेनैव राज्यं पर्यैत् तद्–राजनस्य राजनत्वं ँयद्–राजनं भवति

प्रजानामेव तद्–यजमाना राज्यं परि यन्ति पञ्चवि॒ꣳशं भवति

प्रजापते – [ ] **25**

**TS 7.5.8.3 - Padam**

बृहत् । अन्नाद्यस्येत्यन्न – अद्यस्य । अवरुद्ध्या इत्यव – रुद्ध्यै ।

अथो इति । प्रेति । एव । तेन । जायन्ते ।

एकवि॒ꣳशमित्येक – वि॒ꣳशम् । भद्रम् । द्विपदास्विति द्वि – पदासु ।

प्रतिष्ठित्या इति प्रति – स्थित्यै । पत्नयः । उपेति । गायन्ति ।

मिथुनत्वायेति मिथुन – त्वाय । प्रजात्या इति प्र – जात्यै ।

प्रजापतिरिति प्रजा – पतिः । प्रजा इति प्र–जाः । असृजत । सः ।

अकामयत । आसाम् । अहम् । राज्यम् । परीति । इयाम् । इति ।

तासाम् । राजनेन । एव । राज्यम् । परीति । ऐत् । तत् । राजनस्य ।
राजनत्वमिति राजन – त्वम् । यत् । राजनम् । भवति । प्रजानामिति
प्र – जानाम् । एव । तत् । यजमानाः । राज्यम् । परीति । यन्ति ।
पञ्चवि॒ꣳशमिति पञ्च – वि॒ꣳशम् । भवति ।
प्रजापतेरिति प्रजा – पतेः । **25 (50)**

**TS 7.5.8.4**

–राप्त्यै पञ्चभि–स्तिष्ठन्तः स्तुवन्ति देवलोकमेवाभि जयन्ति
पञ्चभिरासीना मनुष्यलोकमेवाभि जयन्ति दश सं पद्यन्ते दशाक्षरा
विराडन्नं ँविराड् विराजैवा–न्नाद्यमव रुन्धते पञ्चधा विनिषद्य स्तुवन्ति
पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्येकैकयाऽस्तुतया समायन्ति दिग्भ्य
एवान्नाद्यꣳ सं भरन्ति ताभि–रुद्गातोद्–गायति दिग्भ्य
एवान्नाद्यꣳ–[ ] **26**

**TS 7.5.8.4 - Padam**

आप्त्यै । पञ्चभिरिति पञ्च – भिः । तिष्ठन्तः । स्तुवन्ति ।
देवलोकमिति देव – लोकम् । एव । अभीति । जयन्ति ।

पञ्चभिरिति पञ्च – भिः । आसीनाः । मनुष्यलोकमिति
मनुष्य – लोकम् । एव । अभीति । जयन्ति । दश । समिति ।
पद्यन्ते । दशाक्षरेति दश – अक्षरा । विराडिति वि – राट् ।
अन्नम् । विराडिति वि – राट् । विराजेति वि – राजा । एव ।
अन्नाद्यमित्यन्न –अद्यम् । अवेति । रुन्धते । पञ्चधेति पञ्च – धा ।
विनिषद्येति वि – निषद्य । स्तुवन्ति । पञ्च । दिशः । दिक्षु । एव ।
प्रतीति । तिष्ठन्ति । एकैकयेत्येकया – एकया । अस्तुतया ।
समायन्तीति सं – आयन्ति । दिग्भ्य इति दिक् – भ्यः । एव ।
अन्नाद्यमित्यन्न – अद्यम् । समिति । भरन्ति । ताभिः ।
उद्गातेत्युत् – गाता । उदिति । गायति । दिग्भ्य इति दिक् – भ्यः ।
एव । अन्नाद्यमित्यन्न – अद्यम् । **26 (50)**

**TS 7.5.8.5**

संभृत्य तेज आत्मन् दधते तस्मादेकः प्राणः सर्वाण्यङ्गान्यवत्यथो यथा सुपर्ण उत्पतिष्यञ्छिर उत्तमं कुरुत एवमेव तद्–यजमानाः प्रजानामुत्तमा भवन्त्यासन्दी–मुद्गाता ऽऽ रोहति साम्राज्यमेव गच्छन्ति

प्लेङ्खꣳ होता नाकस्यैव पृष्ठꣳ रोहन्ति कूर्चावद्ध्वर्यु-र्ब्रद्ध्नस्यैव विष्टपं गच्छन्त्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति ( ) तिष्ठन्त्यथो आक्रमणमेव तथ् सेतुं ँयजमानाः कुर्वते सुवर्गस्य लोकस्य समष्ट्यै ॥ 27

**TS 7.5.8.5 - Padam**

संभृत्येति सं - भृत्य । तेजः । आत्मन्न् । दधते । तस्मात् । एकः । प्राण इति प्र - अनः । सर्वाणि । अङ्गानि । अवति । अथो इति । यथा । सुपर्ण इति सु - पर्णः । उत्पतिष्यन्नित्युत् - पतिष्यन्न् । शिरः । उत्तममित्युत् - तमम् । कुरुते । एवम् । एव । तत् । यजमानाः । प्रजानामिति प्र - जानाम् । उत्तमा इत्युत् - तमाः । भवन्ति । आसन्दीमित्या - सन्दीम् । उद्गातेत्युत् - गाता । एति । रोहति । साम्राज्यमिति सां - राज्यम् । एव । गच्छन्ति । प्लेङ्खम् । होता । नाकस्य । एव । पृष्ठम् । रोहन्ति । कूर्चौ । अद्ध्वर्युः । ब्रद्ध्नस्य । एव । विष्टपम् । गच्छन्ति । एतावन्तः । वै । देवलोका इति देव - लोकाः । तेषु । एव । यथापूर्वमिति यथा - पूर्वम् ।

प्रतीति ( ) । तिष्ठन्ति । अथो इति । आक्रमणमित्या – क्रमणम् । एव । तत् । सेतुम् । यजमानाः । कुर्वते । सुवर्गस्येति सुवः–गस्य । लोकस्य । समष्ट्या इति सं – अष्ट्यै ॥ **27 (61)** *(सदसः–सप्तदशं–प्रजापते–र्गायिति दिग्भ्य एवान्नाद्यं–प्रत्ये–कादश च) (A8)*

**TS 7.5.9.1**

अर्क्येण वै सहस्रशः प्रजापतिः प्रजा असृजत ताभ्य इलान्देनेरां ँलूता–मवारुन्ध यदर्क्यं भवति प्रजा एव तद्–यजमानाः सृजन्त इलान्दं भवति प्रजाभ्य एव सृष्टाभ्य इरां ँलूतामव रुन्धते तस्माद्–या॑ समा॑ सत्र॑ समृद्धं क्षोधुकास्ता॑ समां प्रजा इष॑ ह्यासा–मूर्ज–माददते या॑ समां ँव्यृद्ध–मक्षोधुकास्ता॑ समां प्रजा – [ ] **28**

**TS 7.5.9.1 - Padam**

अर्क्येण । वै । सहस्रश इति सहस्र – शः । प्रजापतिरिति प्रजा – पतिः । प्रजा इति प्र – जाः । असृजत । ताभ्यः । इलान्देन । इराम् । लूताम् । अवेति । अरुन्ध । यत् । अर्क्यम् । भवति ।

प्रजा इति प्र – जाः । एव । तत् । यजमानाः । सृजन्ते । इलान्दम् ।
भवति । प्रजाभ्य इति प्र – जाभ्यः । एव । सृष्टाभ्यः । इराम् ।
लूताम् । अवेति । रुन्धते । तस्मात् । याम् । समाम् ।
सत्रम् । समृद्धमिति सं – ऋद्धम् । क्षोधुकाः । ताम् । समाम् ।
प्रजा इति प्र – जाः । इषम् । हि । आसाम् । ऊर्जम् ।
आददत इत्या – ददते । याम् । समाम् । व्यृद्धमिति वि – ऋद्धम् ।
अक्षोधुकाः । ताम् । समाम् । प्रजा इति प्र – जाः । **28 (50)**

**TS 7.5.9.2**

न ह्यासा–मिष–मूर्ज–माददत उत्क्रोदं कुर्वते यथा बन्धान्–मुमुचाना
उत्क्रोदं कुर्वत एवमेव तद्–यजमाना देवबन्धान्–मुमुचाना उत्क्रोदं
कुर्वत इषमूर्जमात्मन् दधाना वाणः शततन्तुर्भवति शतायुः पुरुषः
शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्त्याजिं धावन्त्यनभिजितस्या–
भिजित्यै दुन्दुभीन्थ् समाघ्नन्ति परमा वा एषा वाग् या दुन्दुभौ
परमामेव – [ ] **29**

**TS 7.5.9.2 - Padam**

न । हि । आसाम् । इषम् । ऊर्जम् । आददत इत्या – ददते ।

उत्क्रोदमित्युत् – क्रोदम् । कुर्वते । यथा । बन्धात् । मुमुचानाः ।

उत्क्रोदमित्युत् – क्रोदम् । कुर्वते । एवम् । एव । तत् । यजमानाः ।

देवबन्धादिति देव–बन्धात् । मुमुचानाः । उत्क्रोदमित्युत् – क्रोदम् ।

कुर्वते । इषम् । ऊर्जम् । आत्मन्न् । दधानाः । वाणः । शततन्तुरिति

शत – तन्तुः । भवति । शतायुरिति शत – आयुः । पुरुषः ।

शतेन्द्रिय इति शत – इन्द्रियः । आयुषि । एव । इन्द्रिये । प्रतीति ।

तिष्ठन्ति । आजिम् । धावन्ति । अनभिजितस्येत्यनभि – जितस्य ।

अभिजित्या इत्यभि – जित्यै । दुन्दुभीन् ।

समाघ्नन्तीति सं – आघ्नन्ति । परमा । वै । एषा । वाक् । या ।

दुन्दुभौ । परमाम् । एव । **29 (50)**

**TS 7.5.9.3**

वाचमव रुन्धते भूमिदुन्दुभिमा घ्नन्ति यैवेमां ँवाक् प्रविष्टा तामेवाव

रुन्धते ऽथो इमामेव जयन्ति सर्वा वाचो वदन्ति सर्वासां

वाँचामवरुद्ध्या आर्द्रेचर्मन् व्यायच्छेते इन्द्रियस्यावरुद्ध्या आ ऽन्यः क्रोशति प्रान्यः श॑ꣳसति य आक्रोशति पुनात्येवैनान्थ् स यः प्रश॑ꣳसति पूतेष्वेवान्नाद्यं दधात्यृषिकृतं च - [ ] 30

**TS 7.5.9.3 - Padam**

वाचम् । अवेति । रुन्धते । भूमिदुन्दुभिमिति भूमि - दुन्दुभिम् । एति । घ्नन्ति । या । एव । इमाम् । वाक् । प्रविष्टेति प्र - विष्टा । ताम् । एव । अवेति । रुन्धते । अथो इति । इमाम् । एव । जयन्ति । सर्वाः । वाचः । वदन्ति । सर्वासाम् । वाचाम् । अवरुद्ध्या इत्यव - रुद्ध्यै । आर्द्रे । चर्मन्न् । व्यायच्छेते इति वि-आयच्छेते । इन्द्रियस्य । अवरुद्ध्या इत्यव - रुद्ध्यै । एति । अन्यः । क्रोशति । प्रेति । अन्यः । श॑ꣳसति । यः । आक्रोशतीत्या-क्रोशति । पुनाति । एव । एनान् । सः । यः । प्रश॑ꣳसतीति प्र - श॑ꣳसति । पूतेषु । एव । अन्नाद्यमित्यन्न - अद्यम् । दधाति । ऋषिकृतमित्यृषि-कृतम् । च । **30 (50)**

**TS 7.5.9.4**

वा एते देवकृतं च पूर्वैर्मासैरव रुन्धते यद्–भूतेच्छदाꣳ सामानि भवन्त्युभयस्यावरुद्ध्यै यन्ति वा एते मिथुनाद्–ये सँवथ्सर–मुपयन्त्यन्तर्वेदि मिथुनौ सं भवतस्तेनैव मिथुनान्न यन्ति ॥ **31**

**TS 7.5.9.4 - Padam**

वै । एते । देवकृतमिति देव–कृतम् । च । पूर्वैः । मासैः । अवेति । रुन्धते । यत् । भूतेच्छदामिति भूते – छदाम् । सामानि । भवन्ति । उभयस्य । अवरुद्ध्या इत्यव – रुद्ध्यै । यन्ति । वै । एते । मिथुनात् । ये । सँवथ्सरमिति सं–वथ्सरम् । उपयन्तीत्युप–यन्ति । अन्तर्वेदीत्यन्तः – वेदि । मिथुनौ । समिति । भवतः । तेन । एव । मिथुनात् । न । यन्ति ॥ **31 (30)**

***(व्यृद्धमक्षोधुकास्ताꣳ समां प्रजाः – परमामेव – च – त्रिꣳशच्च) (A9)***

**TS 7.5.10.1**

चर्माव भिन्दन्ति पाप्मानमेवैषामव भिन्दन्ति मा ऽप राथ्सीर्मा ऽति व्याथ्सीरित्याह संप्रत्येवैषां पाप्मानमव भिन्दन्त्युदकुम्भानधिनिधाय

दास्यो मार्जालीयं परि नृत्यन्ति पदो निघ्नती-रिदंमधुं गायन्त्यो
मधु वै देवानां परम-मन्नाद्यं परममेवा-न्नाद्यमव रुन्धते
पदो नि घ्नन्ति महीयामेवैषु दधति ॥ 32

**TS 7.5.10.1 - Padam**

चर्म । अवेति । भिन्दन्ति । पाप्मानम् । एव । एषाम् । अवेति ।
भिन्दन्ति । मा । अपेति । राथ्सीः । मा । अतीति । व्याथ्सीः । इति ।
आह । संप्रतीति सं - प्रति । एव । एषाम् । पाप्मानम् । अवेति ।
भिन्दन्ति । उदकुम्भानित्युद-कुम्भान् । अधिनिधायेत्यधि - निधाय ।
दास्यः । मार्जालीयम् । परीति । नृत्यन्ति । पदः । निघ्नतीरिति
नि - घ्नतीः । इदंमधुमितीदं - मधुम् । गायन्त्यः । मधु । वै ।
देवानाम् । परमम् । अन्नाद्यमित्यन्न - अद्यम् । परमम् । एव ।
अन्नाद्यमित्यन्न - अद्यम् । अवेति । रुन्धते । पदः । नीति । घ्नन्ति ।
महीयाम् । एव । एषु । दधति ॥ 32 (49)

*(चर्मै - कान्नपञ्चाशत्) (A10)*

**TS 7.5.11.1**

पृथिव्यै स्वाहा ऽन्तरिक्षाय स्वाहा दिवे स्वाहा संप्लोष्यते स्वाहा संप्लवमानाय स्वाहा संप्लुताय स्वाहा मेघायिष्यते स्वाहा मेघायते स्वाहा मेघिताय स्वाहा मेघाय स्वाहा नीहाराय स्वाहा निहाकायै स्वाहा प्रासचाय स्वाहा प्रचलाकायै स्वाहा विद्योतिष्यते स्वाहा विद्योतमानाय स्वाहा सँविद्योतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहोग्र७ स्तनयते स्वाहा वर्.षिष्यते स्वाहा वर्.षते स्वाहा ऽभिवर्.षते स्वाहा परिवर्.षते स्वाहा सँवर्.षते – [ ] **33**

**TS 7.5.11.1 - Padam**

पृथिव्यै । स्वाहा । अन्तरिक्षाय । स्वाहा । दिवे । स्वाहा । संप्लोष्यत इति सं – प्लोष्यते । स्वाहा । संप्लवमानायेति सं – प्लवमानाय । स्वाहा । संप्लुतायेति सं–प्लुताय । स्वाहा । मेघायिष्यते । स्वाहा । मेघायत इति मेघ – यते । स्वाहा । मेघिताय । स्वाहा । मेघाय । स्वाहा । नीहाराय । स्वाहा । निहाकाया इति नि–हाकायै । स्वाहा । प्रासचाय । स्वाहा । प्रचलाकाया इति प्र – चलाकायै । स्वाहा ।

विद्योतिष्यत इति वि – द्योतिष्यते । स्वाहा । विद्योतमानायेति वि – द्योतमानाय । स्वाहा । सँविद्योतमानायेति सं–विद्योतमानाय । स्वाहा । स्तनयिष्यते । स्वाहा । स्तनयते । स्वाहा । उग्रम् । स्तनयते । स्वाहा । वर्.षिष्यते । स्वाहा । वर्.षते । स्वाहा । अभिवर्.षत इत्यभि – वर्.षते । स्वाहा । परिवर्.षत इति परि – वर्.षते । स्वाहा । सँवर्.षत इति सं – वर्.षते । **33 (50)**

**TS 7.5.11.2**

स्वाहा ऽनुवर्.षते स्वाहा शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहाप्रोषिष्यते स्वाहा प्रुष्णते स्वाहा परिप्रुष्णते स्वाहोद्ग्रहीष्यते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लवमानाय स्वाहा विप्लुताय स्वाहा ऽऽतफ्स्यते स्वाहा ऽऽतपते स्वाहोग्रमातपते स्वाहर्ग्भ्यः स्वाहा यजुर्भ्यः स्वाहा सामभ्यः स्वाहा ऽङ्गिरोभ्यः स्वाहा वेदेभ्यः स्वाहा गाथाभ्यः स्वाहा नाराशꣳसीभ्यः स्वाहा रैभीभ्यः स्वाहा ( ) सर्वस्मै स्वाहा ॥ **34**

**TS 7.5.11.2 - Padam**

स्वाहा । अनुवर्.षत इत्यनु – वर्.षते । स्वाहा । शीकायिष्यते ।
स्वाहा । शीकायत इति शीक – यते । स्वाहा । शीकिताय ।
स्वाहा । प्रोषिष्यते । स्वाहा । प्रुष्णते । स्वाहा । परिप्रुष्णत इति
परि – प्रुष्णते । स्वाहा । उद्ग्रहीष्यत इत्युत् – ग्रहीष्यते । स्वाहा ।
उद्गृह्णत इत्युत् – गृह्णते । स्वाहा । उद्गृहीतायेत्युत् – गृहीताय ।
स्वाहा । विप्लोष्यत इति वि – प्लोष्यते । स्वाहा । विप्लवमानायेति
वि – प्लवमानाय । स्वाहा । विप्लुतायेति वि – प्लुताय । स्वाहा ।
आतफ्स्यत इत्या – तफ्स्यते । स्वाहा । आतपत इत्या – तपते ।
स्वाहा । उग्रम् । आतपत इत्या – तपते । स्वाहा ।
ऋग्भ्य इत्यृक् – भ्यः । स्वाहा । यजुर्भ्य इति यजुः – भ्यः ।
स्वाहा । सामभ्य इति साम – भ्यः । स्वाहा । अङ्गिरोभ्य
इत्यङ्गिरः –भ्यः । स्वाहा । वेदेभ्यः । स्वाहा । गाथाभ्यः । स्वाहा ।
नाराश॒ꣳसीभ्यः । स्वाहा । रैभीभ्यः । स्वाहा ( ) । सर्वस्मै ।
स्वाहा ॥ **34 (52)** *(सँवर्.षते – रैभीभ्यः स्वाहा – द्वे च) (A11)*

**TS 7.5.12.1**

दत्वते स्वाहा ऽदन्तकाय स्वाहा प्राणिने स्वाहा ऽप्राणाय स्वाहा मुखवते स्वाहाऽमुखाय स्वाहा नासिकवते स्वाहा ऽनासिकाय स्वाहा ऽक्षण्वते स्वाहाऽनक्षिकाय स्वाहा कर्णिने स्वाहा ऽकर्णकाय स्वाहा शीर्.षण्वते स्वाहाऽशीर्.षकाय स्वाहा पद्वते स्वाहा ऽपादकाय स्वाहा प्राणते स्वाहा ऽप्राणते स्वाहा वदते स्वाहा ऽवदते स्वाहा पश्यते स्वाहा ऽपश्यते स्वाहा शृण्वते स्वाहा ऽशृण्वते स्वाहा मनस्विने स्वाहा – [ ] **35**

**TS 7.5.12.1 - Padam**

दत्वते । स्वाहा । अदन्तकाय । स्वाहा । प्राणिने । स्वाहा । अप्राणाय । स्वाहा । मुखवत इति मुख–वते । स्वाहा । अमुखाय । स्वाहा । नासिकवत इति नासिक – वते । स्वाहा । अनासिकाय । स्वाहा । अक्षण्वत इत्यक्षण्–वते । स्वाहा । अनक्षिकाय । स्वाहा । कर्णिने । स्वाहा । अकर्णकाय । स्वाहा । शीर्.षण्वत इति

शीर्.षण् – वते । स्वाहा । अशीर्.षकाय । स्वाहा । पद्वत इति
पत् – वते । स्वाहा । अपादकाय । स्वाहा । प्राणत इति प्र–अनते ।
स्वाहा । अप्राणत इत्यप्र – अनते । स्वाहा । वदते । स्वाहा ।
अवदते । स्वाहा । पश्यते । स्वाहा । अपश्यते । स्वाहा । शृण्वते ।
स्वाहा । अशृण्वते । स्वाहा । मनस्विने । स्वाहा । **35 (50)**

**TS 7.5.12.2**

ऽमनसे स्वाहा रेतस्विने स्वाहा ऽरेतस्काय स्वाहा प्रजाभ्यः स्वाहा
प्रजननाय स्वाहा लोमवते स्वाहा ऽलोमकाय स्वाहा त्वचे स्वाहा
ऽत्वक्काय स्वाहा चर्मण्वते स्वाहा ऽचर्मकाय स्वाहा लोहितवते
स्वाहाऽलोहिताय स्वाहा मा॒ꣳसन्वते स्वाहा ऽमा॒ꣳसकाय स्वाहा
स्नावभ्यः स्वाहा ऽस्नावकाय स्वाहा ऽस्थन्वते स्वाहा ऽनस्थिकाय
स्वाहा मज्जन्वते स्वाहा ऽमज्जकाय स्वाहा ऽङ्गिने स्वाहाऽनङ्गाय
स्वाहा ऽऽत्मने स्वाहा ऽनात्मने स्वाहा ( ) सर्वस्मै स्वाहा ॥ **36**

**TS 7.5.12.2 - Padam**

अमनसे । स्वाहा । रेतस्विने । स्वाहा । अरेतस्कायेत्यरेतः – काय । स्वाहा । प्रजाभ्य इति प्र – जाभ्यः । स्वाहा । प्रजननायेति प्र – जननाय । स्वाहा । लोमवत इति लोम – वते । स्वाहा । अलोमकाय । स्वाहा । त्वचे । स्वाहा । अत्वक्काय । स्वाहा । चर्मण्वत इति चर्मण् – वते । स्वाहा । अचर्मकाय । स्वाहा । लोहितवत इति लोहित – वते । स्वाहा । अलोहिताय । स्वाहा । माꣳसन्वत इति माꣳसन्न्–वते । स्वाहा । अमाꣳसकाय । स्वाहा । स्नावभ्य इति स्नाव – भ्यः । स्वाहा । अस्नावकाय । स्वाहा । अस्थन्वत इत्यस्थन्न् – वते । स्वाहा । अनस्थिकाय । स्वाहा । मज्जन्वत इति मज्जन्न् – वते । स्वाहा । अमज्जकाय । स्वाहा । अङ्गिने । स्वाहा । अनङ्गाय । स्वाहा । आत्मने । स्वाहा । अनात्मने । स्वाहा ( ) । सर्वस्मै । स्वाहा ॥ **36 (52)**

*(मनस्विने स्वाहा – ऽनात्मने स्वाहा – द्वे च) (A12)*

**TS 7.5.13.1**

कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वस्य यज्ञस्यर्द्ध्यै मह्यꣳ सन्नत्या अमुष्मै कामायाऽऽयुषे त्वा प्राणाय त्वा ऽपानाय त्वा व्यानाय त्वा व्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा घोषाय त्वा पोषाय त्वा ऽऽराद्घोषाय त्वा प्रच्युत्यै त्वा ॥ **37**

**TS 7.5.13.1 - Padam**

कः । त्वा । युनक्ति । सः । त्वा । युनक्तु । विष्णुः । त्वा । युनक्तु । अस्य । यज्ञस्य । ऋद्ध्यै । मह्यम् । सन्नत्या इति सं – नत्यै । अमुष्मै । कामाय । आयुषे । त्वा । प्राणायेति प्र – अनाय । त्वा । अपानायेत्यप – अनाय । त्वा । व्यानायेति वि – अनाय । त्वा । व्युष्ट्या इति वि – उष्ट्यै । त्वा । रय्यै । त्वा । राधसे । त्वा । घोषाय । त्वा । पोषाय । त्वा । आराद्घोषायेत्यारात् – घोषाय । त्वा । प्रच्युत्या इति प्र – च्युत्यै । त्वा ॥ **37 (38)**

*(कस्त्वा – ष्षात्रिꣳशत्) (A13)*

**TS 7.5.14.1**

अग्नये गायत्राय त्रिवृते राथन्तराय वासन्ताया–ष्टाकपाल

इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्.हताय ग्रैष्मायैकादशकपालो

विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो वार्.षिकेभ्यो

द्वादशकपालो मित्रावरुणाभ्या–मानुष्टुभाभ्या–मेकवि(ग्)शाभ्यां

वैराजाभ्या(ग्) शारदाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय

शाक्वराय हैमन्तिकाय चरुः सवित्र आतिच्छन्दसाय त्रयस्त्रि(ग्)शाय

रैवताय शैशिराय द्वादशकपालो ऽदित्यै विष्णुपत्न्यै चरुरग्नये

वैश्वानराय द्वादशकपालो ऽनुमत्यै चरुः काय एककपालः ॥ **38**

**TS 7.5.14.1 - Padam**

अग्नये । गायत्राय । त्रिवृत इति त्रि–वृते । राथन्तरायेति राथं–तराय ।

वासन्ताय । अष्टाकपाल इत्यष्टा – कपालः । इन्द्राय । त्रैष्टुभाय ।

पञ्चदशायेति पञ्च – दशाय । बार्.हताय । ग्रैष्माय । एकादशकपाल

इत्येकादश – कपालः । विश्वेभ्यः । देवेभ्यः । जागतेभ्यः ।

सप्तदशेभ्य इति सप्त – दशेभ्यः । वैरूपेभ्यः । वार्.षिकेभ्यः ।

द्वादशकपाल इति द्वादश – कपालः ।

मित्रावरुणाभ्यामिति मित्रा – वरुणाभ्याम् ।

आनुष्टुभाभ्यामित्यानु– स्तुभाभ्याम् ।

एकवि(ग्)शाभ्यामित्येक–वि(ग्)शाभ्याम् । वैराजाभ्याम् । शारदाभ्याम् ।

पयस्या । बृहस्पतये । पाङ्क्ताय । त्रिणवायेति त्रि – नवाय ।

शाक्वराय । हैमन्तिकाय । चरुः । सवित्रे ।

आतिच्छन्दसायेत्याति – छन्दसाय । त्रयस्त्रि(ग्)शायेति

त्रयः – त्रि(ग्)शाय । रैवताय । शैशिराय ।

द्वादशकपाल इति द्वादश –कपालः । अदित्यै ।

विष्णुपत्न्या इति विष्णु – पत्न्यै । चरुः ।

अग्नये । वैश्वानराय । द्वादशकपाल इति द्वादश – कपालः ।

अनुमत्या इत्यनु – मत्यै । चरुः । कायः ।

एककपाल इत्येक–कपालः ॥ **38 (47)**

*(अग्नयेऽदित्या अनुमत्यै – सप्तचत्वारि(ग्)शत्) (A14)*

**TS 7.5.15.1**

यो वा अग्नावग्निः प्रह्रियते यश्च सोमो राजा तयोरेष आतिथ्यं

ँयदग्नीषोमीयोऽथैष रुद्रो यश्चीयते यथ् सञ्चितेऽग्नावेतानि

हवीꣳषि न निर्वपेदेष एव रुद्रो ऽशान्त उपोत्थाय प्रजां पशून्.

यजमानस्याभि मन्येत यथ् सञ्चिते ऽग्नावेतानि हवीꣳषि निर्वपति

भागधेयेनैवैनꣳ शमयति नास्य रुद्रो ऽशान्त – [ ] **39**

**TS 7.5.15.1 - Padam**

यः । वै । अग्नौ । अग्निः । प्रह्रियत इति प्र – ह्रियते । यः । च ।

सोमः । राजा । तयोः । एषः । आतिथ्यम् । यत् । अग्नीषोमीय

इत्यग्नी – सोमीयः । अथ । एषः । रुद्रः । यः । चीयते । यत् ।

सञ्चित इति सं – चिते । अग्नौ । एतानि । हवीꣳषि । न ।

निर्वपेदिति निः – वपेत् । एषः । एव । रुद्रः । अशान्तः ।

उपोत्थायेत्युप – उत्थाय । प्रजामिति प्र – जाम् । पशून् ।

यजमानस्य । अभीति । मन्येत । यत् । सञ्चित इति सं–चिते ।

अग्नौ । एतानि । हवीꣳषि । निर्वपतीति निः – वपति ।

भागधेयेनेति भाग – धेयेन । एव । एनम् । शमयति । न । अस्य । रुद्रः । अशान्तः । **39 (50)**

**TS 7.5.15.2**

उपोत्थाय प्रजां पशूनभि मन्यते दश हवीꣳषि भवन्ति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव यजमाने दधात्यथो दशाक्षरा विराडन्नं ँविराड् विराज्येवान्नाद्ये प्रति तिष्ठत्यृतुभिर्वा एष छन्दोभिः स्तोमैः पृष्ठैश्चेतव्य इत्याहुर्यदेतानि हवीꣳषि निर्वपत्यृतुभिरेवैनं छन्दोभिः स्तोमैः पृष्ठैश्चिनुते दिशः सुषुवाणेना – [ ] **40**

**TS 7.5.15.2 - Padam**

उपोत्थायेत्युप – उत्थाय । प्रजामिति प्र–जाम् । पशून् । अभीति । मन्यते । दश । हवीꣳषि । भवन्ति । नव । वै । पुरुषे । प्राणा इति प्र – अनाः । नाभिः । दशमी । प्राणानिति प्र – अनान् । एव । यजमाने । दधाति । अथो इति । दशाक्षरेति दश – अक्षरा । विराडिति वि – राट् । अन्नम् । विराडिति वि – राट् । विराजीति वि – राजि । एव । अन्नाद्य इत्यन्न – अद्ये । प्रतीति ।

तिष्ठति । ऋतुभिरित्यृतु – भिः । वै । एषः ।

छन्दोभिरिति छन्दः– भिः । स्तोमैः । पृष्ठैः । चेतव्यः । इति ।

आहुः । यत् । एतानि । हवीꣳषि । निर्वपतीति निः – वपति ।

ऋतुभिरित्यृतु – भिः । एव । एनम् । छन्दोभिरिति छन्दः – भिः ।

स्तोमैः । पृष्ठैः । चिनुते । दिशः । सुषुवाणेन । **40 (50)**

**TS 7.5.15.3**

–भिजित्या इत्याहुर्यदेतानि हवीꣳषि निर्वपति दिशामभिजित्या एतया वा इन्द्रं देवा अयाजयन् तस्मादिन्द्रसव एतया मनुं मनुष्यास्तस्मान्–मनुसवो यथेन्द्रो देवानां ँयथा मनुर्मनुष्याणामेवं भवति य एवं ँविद्वानेतयेष्ट्या यजते दिग्वतीः पुरोनुवाक्या भवन्ति सर्वासां दिशामभिजित्यै ॥ **41**

**TS 7.5.15.3 - Padam**

अभिजित्या इत्यभि – जित्याः । इति । आहुः । यत् ।

एतानि । हवीꣳषि । निर्वपतीति निः – वपति । दिशाम् ।

अभिजित्या इत्यभि – जित्यै । एतया । वै । इन्द्रम् । देवाः ।

अयाजयन्न् । तस्मात् । इन्द्रसव इतीन्द्र – सवः । एतया । मनुम् ।

मनुष्याः । तस्मात् । मनुसव इति मनु – सवः । यथा । इन्द्रः ।

देवानाम् । यथा । मनुः । मनुष्याणाम् । एवम् । भवति । यः ।

एवम् । विद्वान् । एतया । इष्ट्या । यजते । दिग्वतीरिति दिक्–वतीः ।

पुरोनुवाक्या इति पुरः–अनुवाक्याः । भवन्ति । सर्वासाम् ।

दिशाम् । अभिजित्या इत्यभि – जित्यै ॥ **41 (40)**

*(अशान्तः – सुषुवाणेनै – कचत्वारिꣳशच्च) (A15)*

**<u>TS 7.5.16.1</u>**

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।

य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते द्यौर्महिमा

नक्षत्राणि रूप–मादित्यस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये

स्वाहा ॥ **42**

**TS 7.5.16.1 - Padam**

यः । प्राणत इति प्र – अनतः । निमिषत इति नि – मिषतः ।
महित्वेति महि – त्वा । एकः । इत् । राजा । जगतः । बभूव ॥ यः ।
ईशे । अस्य । द्विपद इति द्वि – पदः । चतुष्पद इति चतुः – पदः ।
कस्मै । देवाय । हविषा । विधेम ॥ उपयामगृहीत इत्युपयाम–गृहीतः ।
असि । प्रजापतय इति प्रजा – पतये । त्वा । जुष्टम् । गृह्णामि ।
तस्य । ते । द्यौः । महिमा । नक्षत्राणि । रूपम् । आदित्यः । ते ।
तेजः । तस्मै । त्वा । महिम्ने । प्रजापतय इति प्रजा – पतये ।
स्वाहा ॥ **42 (38)** *(यः प्राणतो द्यौरादित्यो – ऽष्टात्रिंशत् ) (A16)*

**TS 7.5.17.1**

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यँस्य देवाः ।
यस्य छाया ऽमृतं यँस्य मृत्युः कस्मै देवाय हविषा विधेम ॥
उपयामगृहीतो ऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते पृथिवी
महिमौषधयो वनस्पतयो रूपमग्निस्ते तेजस्तस्मै त्वा महिम्ने
प्रजापतये स्वाहा ॥ **43**

**TS 7.5.17.1 - Padam**

यः । आत्मदा इत्यात्म – दाः । बलदा इति बल – दाः । यस्य । विश्वे । उपासत इत्युप – आसते । प्रशिषमिति प्र–शिषम् । यस्य । देवाः ॥ यस्य । छाया । अमृतम् । यस्य । मृत्युः । कस्मै । देवाय । हविषा । विधेम ॥ उपयामगृहीत इत्युपयाम – गृहीतः । असि । प्रजापतय इति प्रजा – पतये । त्वा । जुष्टम् । गृह्णामि । तस्य । ते । पृथिवी । महिमा । ओषधयः । वनस्पतयः । रूपम् । अग्निः । ते । तेजः । तस्मै । त्वा । महिम्ने । प्रजापतय इति प्रजा – पतये । स्वाहा ॥ **43 (39)**

*(य आत्मदाः पृथिव्यग्नि–रेकान्नचत्वारिꣳशत्) (A17)*

**TS 7.5.18.1**

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाऽस्मिन् राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतां दोग्ध्रीधेनुर्वोढा ऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवा ऽऽ *स्य यजमानस्य

वीरो जायतां निकामेनिकामे नः पर्जन्यो वर्.षतु फलिन्यो न ओषधयः
पच्यन्तां ँयोगक्षेमोनः कल्पतां ॥ **44**

**TS 7.5.18.1 - Padam**

एति । ब्रह्मन्न् । ब्राह्मणः । ब्रह्मवर्चसीति ब्रह्म-वर्चसी । जायताम् ।
एति । अस्मिन्न् । राष्ट्रे । राजन्यः । इषव्यः । शूरः । महारथ इति
महा - रथः । जायताम् । दोग्ध्री । धेनुः । वोढा । अनड्वान् ।
आशुः । सप्तिः । पुरन्धिः । योषा । जिष्णूः । रथेष्ठा इति
रथे - स्थाः । सभेयः । युवा । एति । अस्य । यजमानस्य । वीरः ।
जायताम् । निकामेनिकाम इति निकामे - निकामे । नः । पर्जन्यः ।
वर्.षतु । फलिन्यः । नः । ओषधयः । पच्यन्ताम् ।
योगक्षेम इति योग - क्षेमः । नः । कल्पताम् ॥ **44 (41)**

*(आ ब्रह्म - न्नेकचत्वारिꣳशत् )(A18)*

**TS 7.5.19.1**

आ ऽक्रान्. वाजी पृथिवीमग्निं ँयुजमकृत वाज्यर्वा ऽऽ *क्रान्.
वाज्यन्तरिक्षं ँवायुं ँयुजमकृत वाज्यर्वा द्यां ँवाज्या ऽऽ *क्र॑स्त सूर्यं

ँयुजमकृत वाज्यर्वा ऽग्निस्ते वाजिन्. युङ्ङनु त्वा ऽऽ रभे स्वस्ति मा

सं पारय वायुस्ते वाजिन्. युङ्ङनु त्वा ऽऽ रभे स्वस्ति मा सं – [ ] **45**

**TS 7.5.19.1 - Padam**

एति । अक्रान् । वाजी । पृथिवीम् । अग्निम् । युजम् । अकृत ।

वाजी । अर्वा । एति । अक्रान् । वाजी । अन्तरिक्षम् । वायुम् ।

युजम् । अकृत । वाजी । अर्वा । द्याम् । वाजी । एति । अक्र७स्त ।

सूर्यम् । युजम् । अकृत । वाजी । अर्वा । अग्निः । ते । वाजिन्न् ।

युङ् । अन्विति । त्वा । एति । रभे । स्वस्ति । मा । समिति । पारय ।

वायुः । ते । वाजिन्न् । युङ् । अन्विति । त्वा । एति । रभे । स्वस्ति ।

मा । समिति । **45 (50)**

**TS 7.5.19.2**

पारया ऽऽदित्यस्ते वाजिन्. युङ्ङनु त्वा ऽऽ रभे स्वस्ति मा सं पारय

प्राणधृगसि प्राणं मे दृ७ंह व्यानधृगसि व्यानं मे

दृ७ंहापानधृगस्यपानं मे दृ७ंह चक्षुरसि चक्षुर्मयि धेहि श्रोत्रमसि

श्रोत्रं मयि धेह्यायु–रस्यायुर्मयि धेहि ॥ **46**

**TS 7.5.19.2 - Padam**

पारय । आदित्यः । ते । वाजिन्न् । युङ् । अन्विति । त्वा । एति ।

रभे । स्वस्ति । मा । समिति । पारय । प्राणधृगिति प्राण – धृक् ।

असि । प्राणमिति प्र – अनम् । मे । दृꣳह । व्यानधृगिति

व्यान – धृक् । असि । व्यानमिति वि – अनम् । मे । दृꣳह ।

अपानधृगित्यपान – धृक् । असि । अपानमित्यप – अनम् । मे ।

दृꣳह । चक्षुः । असि । चक्षुः । मयि । धेहि । श्रोत्रम् । असि ।

श्रोत्रम् । मयि । धेहि । आयुः । असि । आयुः । मयि ।

धेहि ॥ **46 (43)***(वायुस्ते वाजिन्. युङ्ङ्नु त्वा ऽऽ रभे स्वस्ति मा सं – त्रिचत्वारिꣳशच्च) (A19)*

**TS 7.5.20.1**

जज्ञि बीजं ँवर्ष्टा पर्जन्यः पक्ता सस्यꣳ सुपिप्पला ओषधयः

स्वधिचरणेयꣳ सूपसदनो ऽग्निः स्वद्ध्यक्ष–मन्तरिक्षꣳसुपावः

पवमानः सूपस्थाना द्यौः शिवमसौ तपन्. यथापूर्व–महोरात्रे

पञ्चदशिनो ऽर्द्धमासा-स्त्रिꣳशिनो मासाः क्लृप्ता ऋतवः शान्तः सँवथ्सरः ॥ **47**

**TS 7.5.20.1 - Padam**

जज्ञि । बीजम् । वर्ष्टा । पर्जन्यः । पक्ता । सस्यम् । सुपिप्पला इति सु - पिप्पलाः । ओषधयः । स्वधिचरणेति सु - अधिचरणा । इयम् । सूपसदन इति सु - उपसदनः । अग्निः । स्वद्ध्यक्षमिति सु - अद्ध्यक्षम् । अन्तरिक्षम् । सुपाव इति सु-पावः । पवमानः । सूपस्थानेति सु - उपस्थाना । द्यौः । शिवम् । असौ । तपन्न् । यथापूर्वमिति यथा - पूर्वम् । अहोरात्रे इत्यहः - रात्रे । पञ्चदशिन इति पञ्च - दशिनः । अर्द्धमासा इत्यर्द्ध - मासाः । त्रिꣳशिनः । मासाः । क्लृप्ताः । ऋतवः । शान्तः । सँवथ्सर इति सं - वथ्सरः ॥ **47 (31)**

*(जज्ञि बीज - मेकत्रिꣳशत्) (A20)*

**TS 7.5.21.1**

आग्नेयोऽष्टाकपालः सौम्यश्चरुः सावित्रोऽष्टाकपालः पौष्णश्चरू

रौद्रश्चरुरग्नये वैश्वानराय द्वादशकपालो मृगाखरे यदि

नाऽऽगच्छे–दग्नये–ऽ॒ꣳहोमुचे–ऽष्टाकपालः सौर्यं पयो वायव्य

आज्यभागः ॥ **48**

**TS 7.5.21.1 - Padam**

आग्नेयः । अष्टाकपाल इत्यष्टा – कपालः । सौम्यः । चरुः ।

सावित्रः । अष्टाकपाल इत्यष्टा – कपालः । पौष्णः । चरुः । रौद्रः ।

चरुः । अग्नये । वैश्वानराय । द्वादशकपाल इति द्वादश – कपालः ।

मृगाखर इति मृग – आखरे । यदि । न । आगच्छेदित्या–गच्छेत् ।

अग्नये । अꣳहोमुच इत्यꣳहः–मुचे । अष्टाकपाल इत्यष्टा–कपालः ।

सौर्यम् । पयः । वायव्यः । आज्यभाग इत्याज्य – भागः ॥ **48 (24)**

*(आग्नेय – श्चतुर्विꣳशतिः) (A21)*

**TS 7.5.22.1**

अग्नये–ऽꣳहोमुचे–ऽष्टाकपाल इन्द्रायाꣳहोमुच एकादशकपालो

मित्रावरुणाभ्या–मागोमुग्भ्यां पयस्या वायोसावित्र आगोमुग्भ्यां

चरुरश्विभ्या–मागोमुग्भ्यां धाना मरुद्भ्य एनोमुग्भ्यः सप्तकपालो विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपालो ऽनुमत्यै चरुरग्नये वैश्वानराय द्वादशकपालो द्यावापृथिवीभ्या–म॒ꣳहोमुग्भ्यां द्विकपालः ॥ 49

**TS 7.5.22.1 - Padam**

अग्नये । अ॒ꣳहोमुच इत्य॒ꣳहः–मुचे । अष्टाकपाल इत्यष्टा–कपालः ।

इन्द्राय । अ॒ꣳहोमुच इत्य॒ꣳहः – मुचे ।

एकादशकपाल इत्येकादश – कपालः ।

मित्रावरुणाभ्यामिति मित्रा – वरुणाभ्याम् ।

आगोमुग्भ्यामित्यागोमुक् – भ्याम् । पयस्या ।

वायोसावित्र इति वायो – सावित्रः ।

आगोमुग्भ्यामित्यागोमुक् – भ्याम् । चरुः ।

अश्विभ्यामित्यश्वि – भ्याम् । आगोमुग्भ्यामित्यागोमुक् – भ्याम् ।

धानाः । मरुद्भ्य इति मरुत् – भ्यः । एनोमुग्भ्य इत्येनोमुक्–भ्यः ।

सप्तकपाल इति सप्त – कपालः । विश्वेभ्यः । देवेभ्यः ।

एनोमुग्भ्य इत्येनोमुक् - भ्यः । द्वादशकपाल इति द्वादश - कपालः ।
अनुमत्या इत्यनु - मत्यै । चरुः । अग्नये । वैश्वानराय ।
द्वादशकपाल इति द्वादश - कपालः । द्यावापृथिवीभ्यामिति
द्यावा - पृथिवीभ्याम् । अꣳहोमुग्भ्यामित्यꣳहोमुक् - भ्याम् ।
द्विकपाल इति द्वि - कपालः ॥ **49 (30)**

*(अग्नयेऽꣳहोमुचे - त्रिꣳशत्) (A22)*

**TS 7.5.23.1**

अग्नये स-मनमत् पृथिव्यै स-मनमद्-यथा ऽग्निः पृथिव्या
समनमदेवं मह्यं भद्राः संनतयः सं नमन्तु वायवे स-मनमदन्तरिक्षाय
स-मनमद्-यथा वायुरन्तरिक्षेण सूर्याय स-मनमद्-दिवे स-मनमद्
यथा सूर्यो दिवा चन्द्रमसे स-मनमन्नक्षत्रेभ्यः स-मनमद्-यथा
चन्द्रमा नक्षत्रैर्वरुणाय स-मनमदद्भ्यः स-मनमद्-यथा - [ ] **50**

**TS 7.5.23.1 - Padam**

अग्नये । समिति । अनमत् । पृथिव्यै । समिति । अनमत् । यथा ।
अग्निः । पृथिव्या । समनमदिति सं - अनमत् । एवम् । मह्यम् ।

भद्राः । संनतय इति सं – नतयः । समिति । नमन्तु । वायवे ।

समिति । अनमत् । अन्तरिक्षाय । समिति । अनमत् । यथा । वायुः ।

अन्तरिक्षेण । सूर्याय । समिति । अनमत् । दिवे । समिति ।

अनमत् । यथा । सूर्यः । दिवा । चन्द्रमसे । समिति । अनमत् ।

नक्षत्रेभ्यः । समिति । अनमत् । यथा । चन्द्रमाः । नक्षत्रैः ।

वरुणाय । समिति । अनमत् । अद्भ्य इत्यत् – भ्यः । समिति ।

अनमत् । यथा । **50 (50)**

**TS 7.5.23.2**

वरुणो ऽद्भिः साम्ने स–मनमदृचे स–मनमद्–यथा सामर्चा ब्रह्मणे

स–मनमत् क्षत्राय समनमद्–यथा ब्रह्म क्षत्रेण राज्ञे स–मनमद्–विशे

स–मनमद्–यथा राजा विशा रथायः स–मनमदश्वेभ्यः समनमद्–यथा

रथो ऽश्वैः प्रजापतये स–मनमद्–भूतेभ्यः स–मनमद्–यथा

प्रजापतिर्भूतैः समनमदेवं मह्यं ( ) भद्राः संनतयः सं नमन्तु ॥ **51**

**TS 7.5.23.2 - Padam**

वरुणः । अद्भिरित्यत् – भिः । साम्ने । समिति । अनमत् । ऋचे ।
समिति । अनमत् । यथा । साम । ऋचा । ब्रह्मणे । समिति ।
अनमत् । क्षत्राय । समिति । अनमत् । यथा । ब्रह्म । क्षत्रेण । राज्ञे ।
समिति । अनमत् । विशे । समिति । अनमत् । यथा । राजा ।
विशा । रथाय । समिति । अनमत् । अश्वेभ्यः । समिति । अनमत् ।
यथा । रथः । अश्वैः । प्रजापतय इति प्रजा – पतये । समिति ।
अनमत् । भूतेभ्यः । समिति । अनमत् । यथा । प्रजापतिरिति
प्रजा – पतिः । भूतैः । समनमदिति सं–अनमत् । एवम् ।
मह्यम् ( ) । भद्राः । संनतय इति सं – नतयः । समिति ।
नमन्तु ॥ **51 (54)** *(अद्भ्यः समनमद्यथा–मह्यं–चत्वारि च) (A23)*

**TS 7.5.24.1**

ये ते पन्थानः सवितः पूर्व्यासो ऽरेणवो वितता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च देव ब्रूहि ॥
नमो ऽग्नये पृथिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि

नमो वायवेऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि
नमः सूर्याय दिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि ॥ **52**

**TS 7.5.24.1 - Padam**

ये । ते । पन्थानः । सवितः । पूर्व्यासः । अरेणवः । वितता इति
वि – तताः । अन्तरिक्षे ॥ तेभिः । नः । अद्य । पथिभिरिति
पथि – भिः । सुगेभिरिति सु – गेभिः । रक्ष । च । नः । अधीति ।
च । देव । ब्रूहि ॥ नमः । अग्नये । पृथिविक्षित इति पृथिवि–क्षिते ।
लोकस्पृत इति लोक – स्पृते । लोकम् । अस्मै । यजमानाय ।
देहि । नमः । वायवे । अन्तरिक्षक्षित इत्यन्तरिक्ष – क्षिते ।
लोकस्पृत इति लोक – स्पृते । लोकम् । अस्मै । यजमानाय ।
देहि । नमः । सूर्याय । दिविक्षित इति दिवि – क्षिते । लोकस्पृत इति
लोक – स्पृते । लोकम् । अस्मै । यजमानाय । देहि ॥ **52 (44)**

*(ये ते – चतुश्चत्वारिꣳशत्) (A24)*

**TS 7.5.25.1**

यो वा अश्वस्य मेद्ध्यस्य शिरो वेद शीर्.षण्वान् मेद्ध्यो

भवत्युषा वा अश्वस्य मेद्ध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणश्चन्द्रमाः

श्रोत्रं दिशः पादा अवान्तरदिशाः पर्.शवोऽहोरात्रे निमेषोऽर्द्धमासाः

पर्वाणि मासाः सन्धानान्यृतवो ऽङ्गानि सँवथ्सर आत्मा रश्मयः केशा

नक्षत्राणि रूपं तारका अस्थानि नभो मा॒ꣳसान्योषधयो

लोमानि वनस्पतयो वाला अग्निर्मुखं ँवैश्वानरो व्यात्त॒ꣳ – [ ] **53**

**TS 7.5.25.1 - Padam**

यः । वै । अश्वस्य । मेद्ध्यस्य । शिरः । वेद । शीर्.षण्वानिति

शीर्.षण्–वान् । मेद्ध्यः । भवति । उषाः । वै । अश्वस्य ।

मेद्ध्यस्य । शिरः । सूर्यः । चक्षुः । वातः । प्राण इति प्र – अनः ।

चन्द्रमाः । श्रोत्रम् । दिशः । पादाः ।

अवान्तरदिशा इत्यवान्तर – दिशाः । पर्.शवः ।

अहोरात्रे इत्यहः – रात्रे । निमेष इति नि – मेषः ।

अर्द्धमासा इत्यर्द्ध – मासाः । पर्वाणि । मासाः । सन्धानानीति सं – धानानि । ऋतवः । अङ्गानि । सँवथ्सर इति सं – वथ्सरः । आत्मा । रश्मयः । केशाः । नक्षत्राणि । रूपम् । तारकाः । अस्थानि । नभः । माꣳसानि । ओषधयः । लोमानि । वनस्पतयः । वालाः । अग्निः । मुखम् । वैश्वानरः । व्यात्तमिति वि – आत्तम् । **53 (50)**

**TS 7.5.25.2**

समुद्र उदरमन्तरिक्षं पायु–र्द्यावापृथिवी आण्डौ ग्रावा शेपः सोमो रेतो यज्जञ्जभ्यते तद्–वि द्योतते यद्–विधूनुते तथ् स्तनयति यन्मेहति तद्–वर्.षति वागेवास्य वागहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु जायत एतौ वै महिमाना–वश्वमभितः सं बभूवतुर्. हयो देवानवह () दर्वाऽसुरान्. वाजी गन्धर्वानश्वोमनुष्यान्थ् समुद्रो वा अश्वस्य योनिः समुद्रो बन्धुः ॥ **54**

**TS 7.5.25.2 - Padam**

समुद्रः । उदरम् । अन्तरिक्षम् । पायुः । द्यावापृथिवी इति द्यावा – पृथिवी । आण्डौ । ग्रावा । शेपः । सोमः । रेतः । यत् ।

जञ्जभ्यते । तत् । वीति । द्योतते । यत् । विधूनुत इति वि–धूनुते । तत् । स्तनयति । यत् । मेहति । तत् । वर्.षति । वाक् । एव । अस्य । वाक् । अहः । वै । अश्वस्य । जायमानस्य । महिमा । पुरस्तात् । जायते । रात्रिः । एनम् । महिमा । पश्चात् । अन्विति । जायते । एतौ । वै । महिमानौ । अश्वम् । अभितः । समिति । बभूवतुः । हयः । देवान् । अवहत् ( ) । अर्वा । असुरान् । वाजी । गन्धर्वान् । अश्वः । मनुष्यान् । समुद्रः । वै । अश्वस्य । योनिः । समुद्रः । बन्धुः ॥ **54 (62)**

*(व्यात्त – मवहद् – द्वादश च ) (A25)*

==============

**Prasna Korvai with starting Padams of 1 to 25Anuvaakams :-**

(गावो – गावः सिषासन्तीः– प्रथमे मासि – समान्यो – यदि सोमौ– षडहै – रुथ् सृज्या(3)न् – देवाना – मर्क्येण – चर्माव – पृथिव्यै – दत्वते – कस्त्वा – ऽग्नये – यो वै – यः प्राणतो – य आत्मदा – आ ब्रह्म – न्नाऽक्रान् – जज्ञि बीज – माग्नेयोऽष्टाकपालो – ऽग्नयेऽ॒होमुचेऽष्टाकपालो – ऽग्नयेसमनमद् – ये ते पन्थानो – यो वा अश्वस्यमेद्ध्यस्य शिरः – पञ्चवि॒शतिः)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(गावः – समान्यः – सवनमष्टाभि – र्वा एते देवकृतञ्चा – भिजित्या इत्याहु –र्वरुणोऽद्भिः साम्ने – चतुष्पञ्चासत्)

**First and Last Padam of fifth Prasnamof 7th Kandam :-**

(गावः – समुद्रो बन्धुः )

**Kaanda Korvai with starting Padams of all 5 Prasanams of Kandam 7**

प्रजननꣳ – साद्याः – प्रजवं – बृहस्पति – र्गावः – पञ्च

**Samhita Korvai with starting Padams of all Seven Kandams**

इषे – वायव्यं – प्रजापति– र्युञ्जानाः – सावित्राणि –

प्राचीनवꣳशो – प्रजननꣳ – सप्त

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

सप्तमकाण्डे पञ्चमः प्रश्नः समाप्तः ॥

॥ इति सप्तमं काण्डं ॥

# ॥ इति तैत्तिरीयसंहिता समाप्ता ॥

**Details of Panchati and Padam for Kandam 7, Prasanam 5 (TS 7.5)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 6 | 313 |
| Anuvakam 2 | 2 | 102 |
| Anuvakam 3 | 2 | 84 |
| Anuvakam 4 | 2 | 102 |
| Anuvakam 5 | 2 | 119 |
| Anuvakam 6 | 4 | 215 |
| Anuvakam 7 | 4 | 220 |
| Anuvakam 8 | 5 | 261 |
| Anuvakam 9 | 4 | 181 |
| Anuvakam 10 | 1 | 49 |
| Anuvakam 11 | 2 | 102 |
| Anuvakam 12 | 2 | 102 |
| Anuvakam 13 | 1 | 38 |
| Anuvakam 14 | 1 | 47 |
| Anuvakam 15 | 3 | 140 |
| Anuvakam 16 | 1 | 38 |
| Anuvakam 17 | 1 | 39 |
| Anuvakam 18 | 1 | 41 |
| Anuvakam 19 | 2 | 93 |
| Anuvakam 20 | 1 | 31 |
| Anuvakam 21 | 1 | 24 |
| Anuvakam 22 | 1 | 30 |
| Anuvakam 23 | 2 | 104 |
| Anuvakam 24 | 1 | 44 |
| Anuvakam 25 | 2 | 112 |
| Total → | 54 | 2631 |

**Notes:**

1. Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.
2. Please download our vedic compilations from our web site www.vedavms.in